# Avadhuta Gita




Published by
MKG Digital University of Sanatan Dharma

# Avadhuta Gita

# अवधूत गीता

Published by

MKG Digital University of Sanatan Dharma

Avadhuta Gita — अवधूत गीता
First Digital Edition, 2026

Published by
MKG Digital University of Sanatan Dharma

This digital edition presents the Sanskrit verses of the Avadhuta Gita without interpretation, commentary, or translation.
The underlying ancient Sanskrit work is presented as a historical and spiritual text. This edition has been independently typeset and digitally formatted for free access, reading, study, sharing, and reuse.

License: CC0 — No Rights Reserved

This digital edition is dedicated to the public domain to the fullest extent permitted by law.
You are free to copy, reproduce, modify, adapt, distribute, publish, share, and use this edition for any purpose, including commercial purposes, without requesting permission.

Edition: First Digital Edition
Language: Sanskrit
Format: Digital PDF
Price: Free
This edition is provided freely for reading, study, education, sharing, and unrestricted reuse.

# Chapters


1. प्रथमोध्यायः — Prathamo'dhyaya
2. द्वितीयोऽध्यायः — Dvitiyo'dhyaya
3. तृतीयोऽध्यायः — Tritiyo'dhyaya
4. चतुर्थोऽध्यायः — Chaturtho'dhyaya
5. पञ्चमोऽध्यायः — Panchamo'dhyaya
6. षष्ठोऽध्यायः — Shashtho'dhyaya
7. सप्तमोऽध्यायः — Saptamo'dhyaya
8. अष्टमोऽध्यायः — Ashtamo'dhyaya

# Chapter 1: अथ प्रथमोऽध्यायः

ईश्वरानुग्रहादेव पुंसामद्वैतवासना ।

महद्भयपरित्राणाद्विप्राणामुपजायते ॥ १ ॥

ishvaranugrahad eva pumsam advaita vasana ।

mahadbhayaparitranad vipranam upajayate ॥ 1 ॥

येनेदं पूरितं सर्वमात्मनैवात्मनात्मनि ।

निराकारं कथं वन्दे ह्यभिन्नं शिवमव्ययम् ॥ २ ॥

yenedam puritam sarvam atmanaivatmanatmani ।

nirakaram katham vande hyabhinnam shivam avyayam ॥ 2 ॥

पञ्चभूतात्मकं विश्वं मरीचिजलसन्निभम् ।

कस्याप्यहो नमस्कुर्यामहमेको निरञ्जनः ॥ ३ ॥

panchabhutatmakam vishvam marichijalasannibham ।

kasyapy aho namaskuryam aham eko niranjanah ॥ 3 ॥

आत्मैव केवलं सर्वं भेदाभेदो न विद्यते ।

अस्ति नास्ति कथं ब्रूयां विस्मयः प्रतिभाति मे ॥ ४ ॥

atmaiva kevalam sarvam bhedabhedo na vidyate ।

asti nasti katham bruyam vismayah pratibhati me ॥ 4 ॥

वेदान्तसारसर्वस्वं ज्ञानं विज्ञानमेव च ।

अहमात्मा निराकारः सर्वव्यापी स्वभावतः ॥ ५ ॥

vedantasara sarvasvam jnanam vijnanam eva cha ।

aham atma nirakarah sarvavyapi svabhavatah ॥ 5 ॥

यो वै सर्वात्मको देवो निष्कलो गगनोपमः ।

स्वभावनिर्मलः शुद्धः स एवायं न संशयः ॥ ६ ॥

yo vai sarvatmako devo nishkalo gaganopamah ।

svabhavanirmalah shuddhah sa evayam na samshayah ॥ 6 ॥

अहमेवाव्ययोऽनन्तः शुद्धविज्ञानविग्रहः ।

सुखं दुःखं न जानामि कथं कस्यापि वर्तते ॥ ७ ॥

aham evavyayo anantah shuddhavijnanavigrahah ।

sukham duhkham na janami katham kasyapi vartate ॥ 7 ॥

न मानसं कर्म शुभाशुभं मे

न कायिकं कर्म शुभाशुभं मे ।

न वाचिकं कर्म शुभाशुभं मे

ज्ञानामृतं शुद्धमतीन्द्रियोऽहम् ॥ ८ ॥

na manasam karma shubhashubham me ।

na kayikam karma shubhashubham me ।

na vachikam karma shubhashubham me ।

jnanamritam shuddham atindriyo aham ॥ 8 ॥

मनो वै गगनाकारं मनो वै सर्वतोमुखम् ।

मनोऽतीतं मनः सर्वं न मनः परमार्थतः ॥ ९ ॥

mano vai gaganakaram mano vai sarvatomukham ।

mano atitam manah sarvam na manah paramarthatah ॥ 9 ॥

अहमेकमिदं सर्वं व्योमातीतं निरन्तरम् ।

पश्यामि कथमात्मानं प्रत्यक्षं वा तिरोहितम् ॥ १० ॥

aham ekam idam sarvam vyomatitam nirantaram ।

pashyami katham atmanam pratyaksham va tirohitam ॥ 10 ॥

त्वमेवमेकं हि कथं न बुध्यसे

समं हि सर्वेषु विमृष्टमव्ययम् ।

सदोदितोऽसि त्वमखण्डितः प्रभो

दिवा च नक्तं च कथं हि मन्यसे ॥ ११ ॥

tvam evam ekam hi katham na budhyase ।

samam hi sarveshu vimrishtam avyayam ।

sadodito asi tvam akhanditah prabho ।

diva cha naktam cha katham hi manyase ॥ 11 ॥

आत्मानं सततं विद्धि सर्वत्रैकं निरन्तरम् ।

अहं ध्याता परं ध्येयमखण्डं खण्ड्यते कथम् ॥ १२ ॥

atmanam satatam viddhi sarvatraikam nirantaram ।

aham dhyata param dhyeyam akhandam khandyate katham ॥ 12 ॥

न जातो न मृतोऽसि त्वं न ते देहः कदाचन ।

सर्वं ब्रह्मेति विख्यातं ब्रवीति बहुधा श्रुतिः ॥ १३ ॥

na jato na mrito asi tvam na te dehah kadachana ।

sarvam brahmeti vikhyatam braviti bahudha shrutih ॥ 13 ॥

स बाह्याभ्यन्तरोऽसि त्वं शिवः सर्वत्र सर्वदा ।

इतस्ततः कथं भ्रान्तः प्रधावसि पिशाचवत् ॥ १४ ॥

sa bahyabhyantaro asi tvam shivah sarvatra sarvada ।

itastatah katham bhrantah pradhavasi pishachavat ॥ 14 ॥

संयोगश्च वियोगश्च वर्तते न च ते न मे ।

न त्वं नाहं जगन्नेदं सर्वमात्मैव केवलम् ॥ १५ ॥

samyogash cha viyogash cha vartate na cha te na me ।

na tvam naham jagan nedam sarvam atmaiva kevalam ॥ 15 ॥

शब्दादिपञ्चकस्यास्य नैवासि त्वं न ते पुनः ।

त्वमेव परमं तत्त्वमतः किं परितप्यसे ॥ १६ ॥

shabdadipanchakasyasya naivasi tvam na te punah ।

tvam eva paramam tattvam atah kim paritapyase ॥ 16 ॥

जन्म मृत्युर्न ते चित्तं बन्धमोक्षौ शुभाशुभौ ।

कथं रोदिषि रे वत्स नामरूपं न ते न मे ॥ १७ ॥

janma mrityur na te chittam bandhamokshau shubhashubhau ।

katham rodishi re vatsa namarupam na te na me ॥ 17 ॥

अहो चित्त कथं भ्रान्तः प्रधावसि पिशाचवत् ।

अभिन्नं पश्य चात्मानं रागत्यागात्सुखी भव ॥ १८ ॥

aho chitta katham bhrantah pradhavasi pishachavat ।

abhinnam pashya chatmanam ragatyagat sukhi bhava ॥ 18 ॥

त्वमेव तत्त्वं हि विकारवर्जितं

निष्कम्पमेकं हि विमोक्षविग्रहम् ।

न ते च रागो ह्यथवा विरागः

कथं हि सन्तप्यसि कामकामतः ॥ १९ ॥

tvam eva tattvam hi vikaravarjitam ।

nishkampam ekam hi vimokshavigraham ।

na te cha rago hy athava viragah ।

katham hi santapyasi kamakamatah ॥ 19 ॥

वदन्ति श्रुतयः सर्वाः निर्गुणं शुद्धमव्ययम् ।

अशरीरं समं तत्त्वं तन्मां विद्धि न संशयः ॥ २० ॥

vadanti shrutayah sarvah nirgunam shuddham avyayam ।

ashariram samam tattvam tan mam viddhi na samshayah ॥ 20 ॥

साकारमनृतं विद्धि निराकारं निरन्तरम् ।

एतत्तत्त्वोपदेशेन न पुनर्भवसम्भवः ॥ २१ ॥

sakaram anritam viddhi nirakaram nirantaram ।

etat tattvopadeshena na punarbhavasambhavah ॥ 21 ॥

एकमेव समं तत्त्वं वदन्ति हि विपश्चितः ।

रागत्यागात्पुनश्चित्तमेकानेकं न विद्यते ॥ २२ ॥

ekam eva samam tattvam vadanti hi vipashchitah ।

ragatyagat punash chittam ekanekam na vidyate ॥ 22 ॥

अनात्मरूपं च कथं समाधि-

रात्मस्वरूपं च कथं समाधिः ।

अस्तीति नास्तीति कथं समाधि-

र्मोक्षस्वरूपं यदि सर्वमेकम् ॥ २३ ॥

anatmarupam cha katham samadhih ।

atmasvarupam cha katham samadhih ।

astiti nastiti katham samadhih ।

mokshasvarupam yadi sarvam ekam ॥ 23 ॥

विशुद्धोऽसि समं तत्त्वं विदेहस्त्वमजोऽव्ययः ।

जानामीह न जानामीत्यात्मानं मन्यसे कथम् ॥ २४ ॥

vishuddho asi samam tattvam videhas tvam ajo avyayah ।

janamiha na janami ity atmanam manyase katham ॥ 24 ॥

तत्त्वमस्यादिवाक्येन स्वात्मा हि प्रतिपादितः ।

नेति नेति श्रुतिर्ब्रूयादनृतं पाञ्चभौतिकम् ॥ २५ ॥

tattvam asyadi vakyena svatma hi pratipaditah ।

neti neti shrutir bruyad anritam panchabhautikam ॥ 25 ॥

आत्मन्येवात्मना सर्वं त्वया पूर्णं निरन्तरम् ।

ध्याता ध्यानं न ते चित्तं निर्लज्जं ध्यायते कथम् ॥ २६ ॥

atmany evatmana sarvam tvaya purnam nirantaram ।

dhyata dhyanam na te chittam nirlajjam dhyayate katham ॥ 26 ॥

शिवं न जानामि कथं वदामि

शिवं न जानामि कथं भजामि ।

अहं शिवश्चेत्परमार्थतत्त्वं

समस्वरूपं गगनोपमं च ॥ २७ ॥

shivam na janami katham vadami ।

shivam na janami katham bhajami ।

aham shivash chet paramartha tattvam ।

samasvarupam gaganopamam cha ॥ 27 ॥

नाहं तत्त्वं समं तत्त्वं कल्पनाहेतुवर्जितम् ।

ग्राह्यग्राहकनिर्मुक्तं स्वसंवेद्यं कथं भवेत् ॥ २८ ॥

naham tattvam samam tattvam kalpanahetuvarjitam ।

grahyagrahaka nirmuktam svasamvedyam katham bhavet ॥ 28 ॥

अनन्तरूपं न हि वस्तु किञ्चि-

त्तत्त्वस्वरूपं न हि वस्तु किञ्चित् ।

आत्मैकरूपं परमार्थतत्त्वं

न हिंसको वापि न चाप्यहिंसा ॥ २९ ॥

anantarupam na hi vastu kinchit ।

tattvasvarupam na hi vastu kinchit ।

atmaikarupam paramartha tattvam ।

na himsako vapi na chapy ahimsa ॥ 29 ॥

विशुद्धोऽसि समं तत्त्वं विदेहमजमव्ययम् ।

विभ्रमं कथमात्मार्थे विभ्रान्तोऽहं कथं पुनः ॥ ३० ॥

vishuddho asi samam tattvam videham ajam avyayam ।

vibhramam katham atmarthe vibhranto aham katham punah ॥ 30 ॥

घटे भिन्ने घटाकाशं सुलीनं भेदवर्जितम् ।

शिवेन मनसा शुद्धो न भेदः प्रतिभाति मे ॥ ३१ ॥

ghate bhinne ghatakasham sulinam bhedavarjitam ।

shivena manasa shuddho na bhedah pratibhati me ॥ 31 ॥

न घटो न घटाकाशो न जीवो जीवविग्रहः ।

केवलं ब्रह्म संविद्धि वेद्यवेदकवर्जितम् ॥ ३२ ॥

na ghato na ghatakasho na jivo jivavigrahah ।

kevalam brahma samviddhi vedyavedakavarjitam ॥ 32 ॥

सर्वत्र सर्वदा सर्वमात्मानं सततं ध्रुवम् ।

सर्वं शून्यमशून्यं च तन्मां विद्धि न संशयः ॥ ३३ ॥

sarvatra sarvada sarvam atmanam satatam dhruvam ।

sarvam shunyam ashunyan cha tan mam viddhi na samshayah ॥ 33 ॥

वेदा न लोका न सुरा न यज्ञा

वर्णाश्रमो नैव कुलं न जातिः ।

न धूममार्गो न च दीप्तिमार्गो

ब्रह्मैकरूपं परमार्थतत्त्वम् ॥ ३४ ॥

veda na loka na sura na yajna ।

varnashramo naiva kulam na jatih ।

na dhumamargo na cha diptimargo ।

brahmaikarupam paramartha tattvam ॥ 34 ॥

व्याप्यव्यापकनिर्मुक्तः त्वमेकः सफलं यदि ।

प्रत्यक्षं चापरोक्षं च ह्यात्मानं मन्यसे कथम् ॥ ३५ ॥

vyapyavyapaka nirmuktah tvam ekah saphalam yadi ।

pratyaksham chaparoksham cha hy atmanam manyase katham ॥ 35 ॥

अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे ।

समं तत्त्वं न विन्दन्ति द्वैताद्वैतविवर्जितम् ॥ ३६ ॥

advaitam kecid ichchhanti dvaitam ichchhanti chapare ।

samam tattvam na vindanti dvaitadvaita vivarjitam ॥ 36 ॥

श्वेतादिवर्णरहितं शब्दादिगुणवर्जितम् ।

कथयन्ति कथं तत्त्वं मनोवाचामगोचरम् ॥ ३७ ॥

shvetadi varnarahitam shabdadigunavarjitam ।

kathayanti katham tattvam manovacham agocharam ॥ 37 ॥

यदाऽनृतमिदं सर्वं देहादिगगनोपमम् ।

तदा हि ब्रह्म संवेत्ति न ते द्वैतपरम्परा ॥ ३८ ॥

yadanritam idam sarvam dehadigaganopamam ।

tada hi brahma samvetti na te dvaita parampara ॥ 38 ॥

परेण सहजात्मापि ह्यभिन्नः प्रतिभाति मे ।

व्योमाकारं तथैवैकं ध्याता ध्यानं कथं भवेत् ॥ ३९ ॥

parena sahajatmapi hy abhinnah pratibhati me ।

vyomakaram tathaivaikam dhyata dhyanam katham bhavet ॥ 39 ॥

यत्करोमि यदश्नामि यज्जुहोमि ददामि यत् ।

एतत्सर्वं न मे किञ्चिद्विशुद्धोऽहमजोऽव्ययः ॥ ४० ॥

yat karomi yad ashnami yaj juhomi dadami yat ।

etat sarvam na me kinchid vishuddho aham ajo avyayah ॥ 40 ॥

सर्वं जगद्विद्धि निराकृतीदं

सर्वं जगद्विद्धि विकारहीनम् ।

सर्वं जगद्विद्धि विशुद्धदेहं

सर्वं जगद्विद्धि शिवैकरूपम् ॥ ४१ ॥

sarvam jagad viddhi nirakritidam ।

sarvam jagad viddhi vikarahinam ।

sarvam jagad viddhi vishuddhadeham ।

sarvam jagad viddhi shivaikarupam ॥ 41 ॥

तत्त्वं त्वं न हि सन्देहः किं जानाम्यथवा पुनः ।

असंवेद्यं स्वसंवेद्यमात्मानं मन्यसे कथम् ॥ ४२ ॥

tattvam tvam na hi sandehah kim janamy athava punah ।

asamvedyam svasamvedyam atmanam manyase katham ॥ 42 ॥

मायाऽमाया कथं तात छायाऽछाया न विद्यते ।

तत्त्वमेकमिदं सर्वं व्योमाकारं निरञ्जनम् ॥ ४३ ॥

maya amaya katham tata chhaya achhaya na vidyate ।

tattvam ekam idam sarvam vyomakaram niranjanam ॥ 43 ॥

आदिमध्यान्तमुक्तोऽहं न बद्धोऽहं कदाचन ।

स्वभावनिर्मलः शुद्ध इति मे निश्चिता मतिः ॥ ४४ ॥

adi madhyanta mukto aham na baddho aham kadachana ।

svabhavanirmalah shuddha iti me nishchita matih ॥ 44 ॥

महदादि जगत्सर्वं न किञ्चित्प्रतिभाति मे ।

ब्रह्मैव केवलं सर्वं कथं वर्णाश्रमस्थितिः ॥ ४५ ॥

mahadadi jagat sarvam na kinchit pratibhati me ।

brahmaiva kevalam sarvam katham varnashramasthitih ॥ 45 ॥

जानामि सर्वथा सर्वमहमेको निरन्तरम् ।

निरालम्बमशून्यं च शून्यं व्योमादिपञ्चकम् ॥ ४६ ॥

janami sarvatha sarvam aham eko nirantaram ।

niralambam ashunyan cha shunyam vyomadi panchakam ॥ 46 ॥

न षण्ढो न पुमान्न स्त्री न बोधो नैव कल्पना ।

सानन्दो वा निरानन्दमात्मानं मन्यसे कथम् ॥ ४७ ॥

na shandho na puman na stri na bodho naiva kalpana ।

sanando va niranandam atmanam manyase katham ॥ 47 ॥

षडङ्गयोगान्न तु नैव शुद्धं

मनोविनाशान्न तु नैव शुद्धम् ।

गुरूपदेशान्न तु नैव शुद्धं

स्वयं च तत्त्वं स्वयमेव बुद्धम् ॥ ४८ ॥

shadangayogan na tu naiva shuddham ।

manovinashan na tu naiva shuddham ।

gurupadeshan na tu naiva shuddham ।

svayam cha tattvam svayam eva buddhham ॥ 48 ॥

न हि पञ्चात्मको देहो विदेहो वर्तते न हि ।

आत्मैव केवलं सर्वं तुरीयं च त्रयं कथम् ॥ ४९ ॥

na hi panchatmako deho videho vartate na hi ।

atmaiva kevalam sarvam turiyam cha trayam katham ॥ 49 ॥

न बद्धो नैव मुक्तोऽहं न चाहं ब्रह्मणः पृथक् ।

न कर्ता न च भोक्ताहं व्याप्यव्यापकवर्जितः ॥ ५० ॥

na baddho naiva mukto aham na chaham brahmanah prithak ।

na karta na cha bhokta aham vyapyavyapaka varjitah ॥ 50 ॥

यथा जलं जले न्यस्तं सलिलं भेदवर्जितम् ।

प्रकृतिं पुरुषं तद्वदभिन्नं प्रतिभाति मे ॥ ५१ ॥

yatha jalam jale nyastam salilam bhedavarjitam ।

prakritim purusham tadvad abhinnam pratibhati me ॥ 51 ॥

यदि नाम न मुक्तोऽसि न बद्धोऽसि कदाचन ।

साकारं च निराकारमात्मानं मन्यसे कथम् ॥ ५२ ॥

yadi nama na mukto asi na baddho asi kadachana ।

sakaram cha nirakaram atmanam manyase katham ॥ 52 ॥

जानामि ते परं रूपं प्रत्यक्षं गगनोपमम् ।

यथा परं हि रूपं यन्मरीचिजलसन्निभम् ॥ ५३ ॥

janami te param rupam pratyaksham gaganopamam ।

yatha param hi rupam yan marichijalasannibham ॥ 53 ॥

न गुरुर्नोपदेशश्च न चोपाधिर्न मे क्रिया ।

विदेहं गगनं विद्धि विशुद्धोऽहं स्वभावतः ॥ ५४ ॥

na gurur nopadeshash cha na chopadhir na me kriya ।

videham gaganam viddhi vishuddho aham svabhavatah ॥ 54 ॥

विशुद्धोऽस्य शरीरोऽसि न ते चित्तं परात्परम् ।

अहं चात्मा परं तत्त्वमिति वक्तुं न लज्जसे ॥ ५५ ॥

vishuddho asi sharira asi na te chittam paratparam ।

aham chatma param tattvam iti vaktum na lajjase ॥ 55 ॥

कथं रोदिषि रे चित्त ह्यात्मैवात्मात्मना भव ।

पिब वत्स कलातीतमद्वैतं परमामृतम् ॥ ५६ ॥

katham rodishi re chitta hy atmaivatmatmana bhava ।

piba vatsa kalatitam advaitam paramamritam ॥ 56 ॥

नैव बोधो न चाबोधो न बोधाबोध एव च ।

यस्येदृशः सदा बोधः स बोधो नान्यथा भवेत् ॥ ५७ ॥

naiva bodho na cha abodho na bodhabodha eva cha ।

yasyedrishah sada bodhah sa bodho nanyatha bhavet ॥ 57 ॥

ज्ञानं न तर्को न समाधियोगो

न देशकालौ न गुरूपदेशः ।

स्वभावसंवित्तरहं च तत्त्व-

माकाशकल्पं सहजं ध्रुवं च ॥ ५८ ॥

jnanam na tarko na samadhiyogo ।

na deshakalau na gurupadeshah ।

svabhavasamvittir aham cha tattvam ।

akashakalpam sahajam dhruvam cha ॥ 58 ॥

न जातोऽहं मृतो वापि न मे कर्म शुभाशुभम् ।

विशुद्धं निर्गुणं ब्रह्म बन्धो मुक्तिः कथं मम ॥ ५९ ॥

na jato aham mrito vapi na me karma shubhashubham ।

vishuddham nirgunam brahma bandho muktih katham mama ॥ 59 ॥

यदि सर्वगतो देवः स्थिरः पूर्णो निरन्तरः ।

अन्तरं हि न पश्यामि स बाह्याभ्यन्तरः कथम् ॥ ६० ॥

yadi sarvagato devah sthirah purno nirantarah ।

antaram hi na pashyami sa bahyabhyantarah katham ॥ 60 ॥

स्फुरत्येव जगत्कृत्स्नमखण्डितनिरन्तरम् ।

अहो मायामहामोहो द्वैताद्वैतविकल्पना ॥ ६१ ॥

sphuraty eva jagat kritsnam akhandita nirantaram ।

aho maya mahamoho dvaitadvaita vikalpana ॥ 61 ॥

साकारं च निराकारं नेति नेतीति सर्वदा ।

भेदाभेदविनिर्मुक्तो वर्तते केवलः शिवः ॥ ६२ ॥

sakaram cha nirakaram neti netiti sarvada ।

bhedabheda vinirmukto vartate kevalah shivah ॥ 62 ॥

न ते च माता च पिता च बन्धुः
न ते च पत्नी न सुतश्च मित्रम् ।
न पक्षपाती न विपक्षपातः
कथं हि सन्तप्तिरियं हि चित्ते ॥ ६३ ॥

na te cha mata cha pita cha bandhuh ।
na te cha patni na sutash cha mitram ।
na pakshapati na vipakshapatah ।
katham hi santaptir iyam hi chitte ॥ 63 ॥

दिवा नक्तं न ते चित्तं उदयास्तमयौ न हि ।
विदेहस्य शरीरत्वं कल्पयन्ति कथं बुधाः ॥ ६४ ॥

diva naktam na te chittam udayastamayau na hi ।
videhasya shariratvam kalpayanti katham budhah ॥ 64 ॥

नाविभक्तं विभक्तं च न हि दुःखसुखादि च ।
न हि सर्वमसर्वं च विद्धि चात्मानमव्ययम् ॥ ६५ ॥

navibhaktam vibhaktam cha na hi duhkhasukhadhi cha ।

na hi sarvam asarvam cha viddhi chatmanam avyayam ॥ 65 ॥

नाहं कर्ता न भोक्ता च न मे कर्म पुराऽधुना ।

न मे देहो विदेहो वा निर्ममेति ममेति किम् ॥ ६६ ॥

naham karta na bhokta cha na me karma puradhuna ।

na me deho videho va nirmameti mameti kim ॥ 66 ॥

न मे रागादिको दोषो दुःखं देहादिकं न मे ।

आत्मानं विद्धि मामेकं विशालं गगनोपमम् ॥ ६७ ॥

na me ragadiko dosho duhkham dehadikam na me ।

atmanam viddhi mam ekam vishalam gaganopamam ॥ 67 ॥

सखे मनः किं बहुजल्पितेन

सखे मनः सर्वमिदं वितर्क्यम् ।

यत्सारभूतं कथितं मया ते
त्वमेव तत्त्वं गगनोपमोऽसि ॥ ६८ ॥

sakhe manah kim bahujalpitena ।
sakhe manah sarvam idam vitarkyam ।
yat sarabhutam kathitam maya te ।
tvam eva tattvam gaganopamo asi ॥ 68 ॥

येन केनापि भावेन यत्र कुत्र मृता अपि ।
योगिनस्तत्र लीयन्ते घटाकाशमिवाम्बरे ॥ ६९ ॥

yena kenapi bhavena yatra kutra mrita api ।
yoginas tatra liyante ghatakasham ivambare ॥ 69 ॥

तीर्थे चान्त्यजगेहे वा नष्टस्मृतिरपि त्यजन् ।
समकाले तनुं मुक्तः कैवल्यव्यापको भवेत् ॥ ७० ॥

tirthe chantyajagehe va nashtasmritir api tyajan ।
samakale tanum muktah kaivalyavyapako bhavet ॥ 70 ॥

धर्मार्थकाममोक्षांश्च द्विपदादिचराचरम् ।

मन्यन्ते योगिनः सर्वं मरीचिजलसन्निभम् ॥ ७१ ॥

dharmarthakamamokshamsh cha dvipadadicharacharam ।

manyante yoginah sarvam marichijalasannibham ॥ 71 ॥

अतीतानागतं कर्म वर्तमानं तथैव च ।

न करोमि न भुञ्जामि इति मे निश्चला मतिः ॥ ७२ ॥

atitanaagatam karma vartamanam tathaiva cha ।

na karomi na bhunjami iti me nishchala matih ॥ 72 ॥

शून्यागारे समरसपूत-

स्तिष्ठन्नेकः सुखमवधूतः ।

चरति हि नग्नस्त्यक्त्वा गर्वं

विन्दति केवलमात्मनि सर्वम् ॥ ७३ ॥

shunyagare samarasaputa ।

tishthann ekah sukham avadhutah ।

charati hi nagnas tyaktva garvam ।

vindati kevalam atmani sarvam ॥ 73 ॥

त्रितयतुरीयं न हि नहि यत्र
विन्दति केवलमात्मनि तत्र ।
धर्माधर्मौ न हि नहि यत्र
बद्धो मुक्तः कथमिह तत्र ॥ ७४ ॥

tritaya turiyam na hi nahi yatra ।
vindati kevalam atmani tatra ।
dharmadharmau na hi nahi yatra ।
baddho muktah katham iha tatra ॥ 74 ॥

विन्दति विन्दति न हि नहि मन्त्रं
छन्दोलक्षणं न हि नहि तन्त्रम् ।
समरसमग्नो भावितपूतः
प्रलपितमेतत्परमवधूतः ॥ ७५ ॥

vindati vindati na hi nahi mantram ।
chhandolakshanam na hi nahi tantram ।
samarasam agno bhavitaputah ।

pralapitam etat param avadhutah ॥ 75 ॥

सर्वशून्यमशून्यं च सत्यासत्यं न विद्यते ।

स्वभावभावतः प्रोक्तं शास्त्रसंवित्तिपूर्वकम् ॥ ७६ ॥

sarvashunyam ashunyan cha satyasatyam na vidyate ।

svabhavabhavatah proktam shastrasamvittipurvakam ॥ 76 ॥

इति प्रथमोऽध्यायः ॥ १ ॥

# Chapter 2: अथ द्वितीयोऽध्यायः

बालस्य वा विषयभोगरतस्य वापि
मूर्खस्य सेवकजनस्य गृहस्थितस्य ।
एतद्गुरोः किमपि नैव न चिन्तनीयं
रत्नं कथं त्यजति कोऽप्यशुचौ प्रविष्टम् ॥ १ ॥

balasya va vishayabhogaratasy vapi
murkhasya sevakajanasya grihasthitasya ।
etad guroh kim api naiva na chintaniyam
ratnam katham tyajati ko'pyashuchau pravishtam ॥ 1 ॥

नैवात्र काव्यगुण एव तु चिन्तनीयो
ग्राह्यः परं गुणवता खलु सार एव ।
सिन्दूरचित्ररहिता भुवि रूपशून्या
पारं न किं नयति नौरिह गन्तुकामान् ॥ २ ॥

naivatra kavyaguna eva tu chintaniyo
grahyah param gunavata khalu sara eva ।

sindurachitrarahita bhuvi rupashunya

param na kim nayati naur iha gantukaman ॥ 2 ॥

प्रयत्नेन विना येन निश्चलेन चलाचलम् ।

ग्रस्तं स्वभावतः शान्तं चैतन्यं गगनोपमम् ॥ ३ ॥

prayatnena vina yena nishchalena chalachalam ।

grastam svabhavatah shantam chaitanyam gaganopamam ॥ 3 ॥

अयत्नाच्छालयेद्यस्तु एकमेव चराचरम् ।

सर्वगं तत्कथं भिन्नमद्वैतं वर्तते मम ॥ ४ ॥

ayatnach chalayedyas tu ekam eva characharam ।

sarvagam tat katham bhinnam advaitam vartate mama ॥ 4 ॥

अहमेव परं यस्मात्सारात्सारतरं शिवम् ।

गमागमविनिर्मुक्तं निर्विकल्पं निराकुलम् ॥ ५ ॥

ahameva param yasmatsarat sarataram shivam ।
gamagamavinirmuktam nirvikalpam nirakulam ॥ 5 ॥

सर्वावयवनिर्मुक्तं तथाहं त्रिदशार्चितम् ।
सम्पूर्णत्वान्न गृह्णामि विभागं त्रिदशादिकम् ॥ ६ ॥

sarvavayavanirmuktam tathaham tridasharchitam ।
sampurnatvan na grihnami vibhagam tridashadikam ॥ 6 ॥

प्रमादेन न सन्देहः किं करिष्यामि वृत्तिमान् ।
उत्पद्यन्ते विलीयन्ते बुद्बुदाश्च यथा जले ॥ ७ ॥

pramadena na sandehah kim karishyami vrittiman ।
utpadyante viliyante budbudash cha yatha jale ॥ 7 ॥

महदादीनि भूतानि समाप्यैवं सदैव हि ।
मृदुद्रव्येषु तीक्ष्णेषु गुडेषु कटुकेषु च ॥ ८ ॥

mahadadini bhutani samapyaivam sadaiva hi ।
mridudravyeshu tikshneshu gudeshu katukeshu cha ॥ 8 ॥

कटुत्वं चैव शैत्यत्वं मृदुत्वं च यथा जले ।

प्रकृतिः पुरुषस्तद्वदभिन्नं प्रतिभाति मे ॥ ९ ॥

katutvam chaiva shaityatvam mridutvam cha yatha jale ।

prakritih purushas tadvad abhinnam pratibhati me ॥ 9 ॥

सर्वाख्यारहितं यद्यत्सूक्ष्मात्सूक्ष्मतरं परम् ।

मनोबुद्धीन्द्रियातीतमकलङ्कं जगत्पतिम् ॥ १० ॥

sarvakhyarahitam yad yat sukshmat sukshmataram param ।

manobuddhindriyatitam akalankam jagatpatim ॥ 10 ॥

ईदृशं सहजं यत्र अहं तत्र कथं भवेत् ।

त्वमेव हि कथं तत्र कथं तत्र चराचरम् ॥ ११ ॥

idrisham sahajam yatra aham tatra katham bhavet ।

tvam eva hi katham tatra katham tatra characharam ॥ 11 ॥

गगनोपमं तु यत्प्रोक्तं तदेव गगनोपमम् ।

चैतन्यं दोषहीनं च सर्वज्ञं पूर्णमेव च ॥ १२ ॥

gaganopamam tu yat proktam tad eva gaganopamam ।

chaitanyam doshahinam cha sarvajnam purnam eva cha ॥ 12 ॥

पृथिव्यां चरितं नैव मारुतेन च वाहितम् ।

वारिणा पिहितं नैव तेजोमध्ये व्यवस्थितम् ॥ १३ ॥

prithivyam charitam naiva marutena cha vahitam ।

varina pihitam naiva tejomadhye vyavasthitam ॥ 13 ॥

आकाशं तेन संव्याप्तं न तद्व्याप्तं च केनचित् ।

स बाह्याभ्यन्तरं तिष्ठत्यवच्छिन्नं निरन्तरम् ॥ १४ ॥

akasham tena samvyaptam na tad vyaptam cha kenachit ।

sa bahyabhyantaram tishthaty avachchhinnam nirantaram ॥ 14 ॥

सूक्ष्मत्वात्तदद्दृश्यत्वान्निर्गुणत्वाच्च योगिभिः ।
आलम्बनादि यत्प्रोक्तं क्रमादालम्बनं भवेत् ॥ १५ ॥

sukshmatvat tad adrishyatvan nirgunatvach cha yogibhih ।
alambanadi yat proktam kramad alambanam bhavet ॥ 15 ॥

सतताभ्यासयुक्तस्तु निरालम्बो यदा भवेत् ।
तल्लयाल्लीयते नान्तर्गुणदोषविवर्जितः ॥ १६ ॥

satatabhyasayuktas tu niralambo yada bhavet ।
tallayal liyate nantar gunadoshavivarjitah ॥ 16 ॥

विषविश्वस्य रौद्रस्य मोहमूर्च्छाप्रदस्य च ।
एकमेव विनाशाय ह्यमोघं सहजामृतम् ॥ १७ ॥

vishavishvasya raudrasya mohamurchchapradasya cha ।
ekam eva vinashaya hy amogham sahajamritam ॥ 17 ॥

भावगम्यं निराकारं साकारं दृष्टिगोचरम् ।
भावाभावविनिर्मुक्तमन्तरालं तदुच्यते ॥ १८ ॥

bhavagamyam nirakaram sakaram drishtigocharam ।

bhavabhavavinirmuktam antaralam tad uchyate ॥ 18 ॥

बाह्यभावं भवेद्विश्वमन्तः प्रकृतिरुच्यते ।

अन्तरादन्तरं ज्ञेयं नारिकेलफलाम्बुवत् ॥ १९ ॥

bhyabhavam bhaved vishvam antah prakritir uchyate ।

antarad antaram jneyam narikelaphalambuvat ॥ 19 ॥

भ्रान्तिज्ञानं स्थितं बाह्यं सम्यग्ज्ञानं च मध्यगम् ।

मध्यान्मध्यतरं ज्ञेयं नारिकेलफलाम्बुवत् ॥ २० ॥

bhrantijnanam sthitam bahyam samyagjnanam cha madhyagam ।

madhyan madhyataram jneyam narikelaphalambuvat ॥ 20 ॥

पौर्णमास्यां यथा चन्द्र एक एवातिनिर्मलः ।

तेन तत्सदृशं पश्येद्द्विधादृष्टिर्विपर्ययः ॥ २१ ॥

paurnamasyam yatha chandra eka evatinirmalah ।

tena tat sadhrisham pashyed dvidhadrshtir viparyayah ॥ 21 ॥

अनेनैव प्रकारेण बुद्धिभेदो न सर्वगः ।

दाता च धीरतामेति गीयते नामकोटिभिः ॥ २२ ॥

anenaiva prakaren buddhibhedo na sarvagah ।

data cha dhiratam eti giyate namakotibhih ॥ 22 ॥

गुरुप्रज्ञाप्रसादेन मूर्खो वा यदि पण्डितः ।

यस्तु सम्बुध्यते तत्त्वं विरक्तो भवसागरात् ॥ २३ ॥

guruprajnaprasadena murkho va yadi panditah ।

yas tu sambudhyate tattvam virakto bhavasagarat ॥ 23 ॥

रागद्वेषविनिर्मुक्तः सर्वभूतहिते रतः ।

दृढबोधश्च धीरश्च स गच्छेत्परमं पदम् ॥ २४ ॥

ragadveshavinirmuktah sarvabhutahite ratah ।

dridhabodhash cha dhirash cha sa gachchet paramam padam ॥ 24 ॥

घटे भिन्ने घटाकाश आकाशे लीयते यथा ।

देहाभावे तथा योगी स्वरूपे परमात्मनि ॥ २५ ॥

ghate bhinne ghatakash akashe liyate yatha ।

dehabhave tatha yogi svarupe paramatmani ॥ 25 ॥

उक्तेयं कर्मयुक्तानां मतिर्यान्तेऽपि सा गतिः ।

न चोक्ता योगयुक्तानां मतिर्यान्तेऽपि सा गतिः ॥ २६ ॥

ukteyam karmayuktanam matir yante'pi sa gatih ।

na chokta yogayuktanam matir yante'pi sa gatih ॥ 26 ॥

या गतिः कर्मयुक्तानां सा च वागिन्द्रियाद्वदेत् ।

योगिनां या गतिः क्वापि ह्यकथ्या भवतोर्जिता ॥ २७ ॥

ya gatih karmayuktanam sa cha vagindriyad vadet ।

yoginam ya gatih kvapi hy akathya bhavatorjita ॥ 27 ॥

एवं ज्ञात्वा त्वमुं मार्गं योगिनां नैव कल्पितम् ।

विकल्पवर्जनं तेषां स्वयं सिद्धिः प्रवर्तते ॥ २८ ॥

evam jnatva tv amum margam yoginam naiva kalpitam ।

vikalpavarjanam tesham svayam siddhih pravartate ॥ 28 ॥

तीर्थे वान्त्यजगेहे वा यत्र कुत्र मृतोऽपि वा ।

न योगी पश्यते गर्भं परे ब्रह्मणि लीयते ॥ २९ ॥

tirthe vantyajagehe va yatra kutra mrito'pi va ।

na yogi pashyate garbham pare brahmani liyate ॥ 29 ॥

सहजमजमचिन्त्यं यस्तु पश्येत्स्वरूपं घटति यदि यथेष्टं लिप्यते नैव दोषैः ।

सकृदपि तदभावात्कर्म किञ्चिन्नकुर्यात् तदपि न च विबद्धः संयमी वा तपस्वी ॥ ३० ॥

sahajam ajam achintyam yas tu pashyet svarupam

ghatati yadi yatheshtam lipyate naiva doshaih ।

sakrid api tadabhavat karma kinchin na kuryat

tad api na cha vibaddhah samyami va tapasvi ॥ 30 ॥

निरामयं निष्प्रतिमं निराकृतिं

निराश्रयं निर्वपुषं निराशिषम् ।

निर्द्वन्द्वनिर्मोहमलुप्तशक्तिकं

तमीशमात्मानमुपैति शाश्वतम् ॥ ३१ ॥

niramayam nispratimam nirakritim

nirashrayam nirvapusham nirashisham ।

nirdvandvanirmoham aluptashaktikam

tam isham atmanam upaiti shashvatam ॥ 31 ॥

वेदो न दीक्षा न च मुण्डनक्रिया

गुरुर्न शिष्यो न च यन्त्रसम्पदः ।

मुद्रादिकं चापि न यत्र भासते

तमीशमात्मानमुपैति शाश्वतम् ॥ ३२ ॥

vedo na diksha na cha mundanakriya

gurur na shishyo na cha yantrasampadah ।

mudradikam chapi na yatra bhasate

tam isham atmanam upaiti shashvatam ॥ 32 ॥

न शाम्भवं शाक्तिकमानवं न वा

पिण्डं च रूपं च पदादिकं न वा ।

आरम्भनिष्पत्तिघटादिकं च नो

तमीशमात्मानमुपैति शाश्वतम् ॥ ३३ ॥

na shambhavam shaktikam manavam na va

pindam cha rupam cha padadikam na va ।

arambhanishpattighatadikam cha no

tam isham atmanam upaiti shashvatam ॥ 33 ॥

यस्य स्वरूपात्सचराचरं जग-

दुत्पद्यते तिष्ठति लीयतेऽपि वा ।

पयोविकारादिव फेनबुद्बुदा-

स्तमीशमात्मानमुपैति शाश्वतम् ॥ ३४ ॥

yasya svarupat sacharacharam jagad

utpadyate tishthati liyate'pi va ।

payovikarad iva phenabudbudah

tam isham atmanam upaiti shashvatam ॥ 34 ॥

नासानिरोधो न च दृष्टिरासनं

बोधोऽप्यबोधोऽपि न यत्र भासते ।

नाडीप्रचारोऽपि न यत्र किञ्चि-

त्तमीशमात्मानमुपैति शाश्वतम् ॥ ३५ ॥

nasanirodho na cha drishtir asanam

bodho'py abodho'pi na yatra bhasate ।

nadipracharo'pi na yatra kinchit

tam isham atmanam upaiti shashvatam ॥ 35 ॥

नानात्वमेकत्वमुभत्वमन्यता

अणुत्वदीर्घत्वमहत्त्वशून्यता ।

मानत्वमेयत्वसमत्ववर्जितं

तमीशमात्मानमुपैति शाश्वतम् ॥ ३६ ॥

nanatvam ekatvam ubhatvam anyata

anutva dirghatvam ahattva shunyata ।

manatvam eyatva samatva varjitam

tam isham atmanam upaiti shashvatam ॥ 36 ॥

सुसंयमी वा यदि वा न संयमी सुसङ्ग्रही वा यदि वा न सङ्ग्रही ।

निष्कर्मको वा यदि वा सकर्मक- स्तमीशमात्मानमुपैति शाश्वतम् ॥ ३७ ॥

susamyami va yadi va na samyami

susangrahi va yadi va na sangrahi ।

nishkarmako va yadi va sakarmaka

tam isham atmanam upaiti shashvatam ॥ 37 ॥

मनो न बुद्धिर्न शरीरमिन्द्रियं

तन्मात्रभूतानि न भूतपञ्चकम् ।

अहङ्कृतिश्चापि वियत्स्वरूपकं

तमीशमात्मानमुपैति शाश्वतम् ॥ ३८ ॥

mano na buddhir na shariram indriyam

tanmatrabhutani na bhutapanchakam ।

ahankritish chapi viyatsvarupakam

tam isham atmanam upaiti shashvatam ॥ 38 ॥

विधौ निरोधे परमात्मतां गते न योगिनश्चेतसि भेदवर्जिते ।
शौचं न वाशौचमलिङ्गभावना सर्वं विधेयं यदि वा निषिध्यते ॥ ३९ ॥

vidhau nirodhe paramatmatam gate
na yoginash chetasi bhedavarjite ।
shaucham na vashaucham alingabhavana
sarvam vidheyam yadi va nishidhyate ॥ 39 ॥

मनो वचो यत्र न शक्तमीरितुं नूनं कथं तत्र गुरूपदेशता ।
इमां कथामुक्तवतो गुरोस्त- द्युक्तस्य तत्त्वं हि समं प्रकाशते ॥ ४० ॥

mano vacho yatra na shaktam iritum
nunam katham tatra guropadeshata ।
imam katham uktavato guros tad
yuktasya tattvam hi samam prakashate ॥ 40 ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

# Chapter 3: अथ तृतीयोऽध्यायः

गुणविगुणविभागो वर्तते नैव किञ्चित्

रतिविरतिविहीनं निर्मलं निष्प्रपञ्चम् ।

गुणविगुणविहीनं व्यापकं विश्वरूपं

कथमहमिह वन्दे व्योमरूपं शिवं वै ॥ १ ॥

gunavigunavibhago vartate naiva kinchit

rativirativihinam nirmalam nishprapancham ।

gunavigunavihinam vyapakam vishvarupam

katham aham iha vande vyomarupam shivam vai ॥ 1 ॥

श्वेतादिवर्णरहितो नियतं शिवश्च

कार्यं हि कारणमिदं हि परं शिवश्च ।

एवं विकल्परहितोऽहमलं शिवश्च

स्वात्मनमात्मनि सुमित्र कथं नमामि ॥ २ ॥

shvetadivarnarahito niyatam shivash cha

karyam hi karanam idam hi param shivash cha ।

evam vikalparahito'ham alam shivash cha

svatmanam atmani sumitra katham namami ॥ 2 ॥

निर्मूलमूलरहितो हि सदोदितोऽहं

निर्धूमधूमरहितो हि सदोदितोऽहम् ।

निर्दीपदीपरहितो हि सदोदितोऽहं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३ ॥

nirmulamularahito hi sadodito'ham

nirdhumadhumarahito hi sadodito'ham ।

nirdeepadiparahito hi sadodito'ham

jnanamritam samarasaṁ gaganopamo'ham ॥ 3 ॥

निष्कामकाममिह नाम कथं वदामि

निःसङ्गसङ्गमिह नाम कथं वदामि ।

निःसारसाररहितं च कथं वदामि

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ४ ॥

nishkamakamamiha nama katham vadami

nih-sangasangamiha nama katham vadami ।

nih-sarasaararahitam cha katham vadami

jnanamritam samarasaṁ gaganopamo'ham ॥ 4 ॥

अद्वैतरूपमखिलं हि कथं वदामि

द्वैतस्वरूपमखिलं हि कथं वदामि ।

नित्यं त्वनित्यमखिलं हि कथं वदामि

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ५ ॥

advaitarupam akhilam hi katham vadami

dvaitasvarupam akhilam hi katham vadami ।

nityam tv anityam akhilam hi katham vadami

jnanamritam samarasaṁ gaganopamo'ham ॥ 5 ॥

स्थूलं हि नो न हि कृशं न गतागतं हि

आद्यन्तमध्यरहितं न परापरं हि ।

सत्यं वदामि खलु वै परमार्थतत्त्वं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ६ ॥

sthulam hi no na hi krisham na gatagatam hi

adyantamadhyarahitam na paraparam hi ।

satyam vadami khalu vai paramarthatattvam

jnanamritam samarasaṁ gaganopamo'ham ॥ 6 ॥

संविद्धि सर्वकरणानि नभोनिभानि

संविद्धि सर्वविषयांश्च नभोनिभांश्च ।

संविद्धि चैकममलं न हि बन्धमुक्तं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ७ ॥

samviddhi sarvakarani nabhonibhani

samviddhi sarvavishayamsh cha nabhonibhansh cha ।

samviddhi chaikam amalam na hi bandhamuktam

jnanamritam samarasaṁ gaganopamo'ham ॥ 7 ॥

दुर्बोधबोधगहनो न भवामि तात

दुर्लक्ष्यलक्ष्यगहनो न भवामि तात ।

आसन्नरूपगहनो न भवामि तात

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ८ ॥

durbodhabodhagahano na bhavami tata

durlakshyalakshyagahano na bhavami tata ।

asannarupagahano na bhavami tata

jnanamritam samarasaṁ gaganopamo'ham ॥ 8 ॥

निष्कर्मकर्मदहनो ज्वलनो भवामि

निर्दुःखदुःखदहनो ज्वलनो भवामि ।

निर्देहदेहदहनो ज्वलनो भवामि

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ९ ॥

nishkarmakarmadahano jvalano bhavami

nirduhkha-duhkhadahano jvalano bhavami ।

nirdeha-dehadahano jvalano bhavami

jnanamritam samarasaṁ gaganopamo'ham ॥ 9 ॥

निष्पापपापदहनो हि हुताशनोऽहं

निर्धर्मधर्मदहनो हि हुताशनोऽहम् ।

निर्बन्धबन्धदहनो हि हुताशनोऽहं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ १० ॥

nishpapapapadahano hi hutashano'ham

nirdharmadharmadahano hi hutashano'ham ।

nirbandhabandhadahano hi hutashano'ham

jnanamritam samarasaṁ gaganopamo'ham ॥ 10 ॥

निर्भावभावरहितो न भवामि वत्स

निर्योगयोगरहितो न भवामि वत्स ।

निश्चित्तचित्तरहितो न भवामि वत्स

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ११ ॥

nirbhavabhavarahito na bhavami vatsa

niryogayogarahito na bhavami vatsa ।

nishchittachittarahito na bhavami vatsa

jnanamritam samarasaṁ gaganopamo'ham ॥ 11 ॥

निर्मोहमोहपदवीति न मे विकल्पो

निःशोकशोकपदवीति न मे विकल्पः ।

निर्लोभलोभपदवीति न मे विकल्पो

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ १२ ॥

nirmohamohapadaviti na me vikalpo

nihshokashokapadaviti na me vikalpah ।

nirlobhalobhapadaviti na me vikalpo

jnanamritam samarasaṁ gaganopamo'ham ॥ 12 ॥

संसारसन्ततिलता न च मे कदाचित्

सन्तोषसन्ततिसुखो न च मे कदाचित् ।

अज्ञानबन्धनमिदं न च मे कदाचित्

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ १३ ॥

samsarasantalata na cha me kadachit

santoshasantatisukho na cha me kadachit ।

ajnanabandhanam idam na cha me kadachit

jnanamritam samarasaṁ gaganopamo'ham ॥ 13 ॥

संसारसन्ततिरजो न च मे विकारः

सन्तापसन्ततितमो न च मे विकारः ।

सत्त्वं स्वधर्मजनकं न च मे विकारो

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ १४ ॥

samsarasantarajo na cha me vikarah

santapasantatitamo na cha me vikarah ।

sattvam svadharmajanakam na cha me vikaro

jnanamritam samarasaṁ gaganopamo'ham ॥ 14 ॥

सन्तापदुःखजनको न विधिः कदाचित्

सन्तापयोगजनितं न मनः कदाचित् ।

यस्मादहङ्कृतिरियं न च मे कदाचित्

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ १५ ॥

santapaduhkhajanako na vidhih kadachit

santapayogajanitam na manah kadachit ।

yasmad ahankritir iyam na cha me kadachit

jnanamritam samarasaṁ gaganopamo'ham ॥ 15 ॥

निष्कम्पकम्पनिधनं न विकल्पकल्पं

स्वप्नप्रबोधनिधनं न हिताहितं हि ।

निःसारसारनिधनं न चराचरं हि

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ १६ ॥

nishkampakampanidhanam na vikalpakalpam

svapnaprabodhanidhanam na hitahitam hi ।

nihsarasaranidhanam na characharam hi

jnanamritam samarasaṁ gaganopamo'ham ॥ 16 ॥

नो वेद्यवेदकमिदं न च हेतुतर्क्यं

वाचामगोचरमिदं न मनो न बुद्धिः ।

एवं कथं हि भवतः कथयामि तत्त्वं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ १७ ॥

no vedyavedakam idam na cha hetutarkyam

vachamagocharam idam na mano na buddhih ।

evam katham hi bhavatah kathayami tattvam

jnanamritam samarasaṁ gaganopamo'ham ॥ 17 ॥

निर्भिन्नभिन्नरहितं परमार्थतत्त्व-

मन्तर्बहिर्न हि कथं परमार्थतत्त्वम् ।

प्राक्सम्भवं न च रतं न हि वस्तु किञ्चित्

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ १८ ॥

nirbhinnabhinnarahitam paramarthatattvam

antarbahir na hi katham paramarthatattvam ।

praksambhavam na cha ratam na hi vastu kinchit

jnanamritam samarasaṁ gaganopamo'ham ॥ 18 ॥

रागादिदोषरहितं त्वहमेव तत्त्वं

दैवादिदोषरहितं त्वहमेव तत्त्वम् ।

संसारशोकरहितं त्वहमेव तत्त्वं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ १९ ॥

ragadidosharahitam tv aham eva tattvam

daivadidosharahitam tv aham eva tattvam ।

samsarashokarahitam tv aham eva tattvam

jnanamritam samarasaṁ gaganopamo'ham ॥ 19 ॥

स्थानत्रयं यदि च नेति कथं तुरीयं

कालत्रयं यदि च नेति कथं दिशश्च ।

शान्तं पदं हि परमं परमार्थतत्त्वं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ २० ॥

sthanatrayam yadi cha neti katham turiyam

kalatrayam yadi cha neti katham dishash cha ।

shantam padam hi paramam paramarthatattvam

jnanamritam samarasaṁ gaganopamo'ham ॥ 20 ॥

दीर्घो लघुः पुनरितीह नमे विभागो

विस्तारसंकटमितीह न मे विभागः ।

कोणं हि वर्तुलमितीह न मे विभागो

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ २१ ॥

dirgho laghuh punar iti iha na me vibhago

vistarasankatam iti iha na me vibhagah ।

konam hi vartulam iti iha na me vibhago

jnanamritam samarasaṁ gaganopamo'ham ॥ 21 ॥

मातापितादि तनयादि न मे कदाचित्

जातं मृतं न च मनो न च मे कदाचित् ।

निर्व्याकुलं स्थिरमिदं परमार्थतत्त्वं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ २२ ॥

matapitadi tanayadi na me kadachit

jatam mritam na cha mano na cha me kadachit ।

nirvyakulam sthiram idam paramarthatattvam

jnanamritam samarasaṁ gaganopamo'ham ॥ 22 ॥

शुद्धं विशुद्धमविचारमनन्तरूपं

निर्लेपलेपमविचारमनन्तरूपम् ।

निष्खण्डखण्डमविचारमनन्तरूपं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ २३ ॥

shuddham vishuddham avicharam anantarupam

nirlepaleepam avicharam anantarupam ।

nishkhandakhandam avicharam anantarupam

jnanamritam samarasaṁ gaganopamo'ham ॥ 23 ॥

ब्रह्मादयः सुरगणाः कथमत्र सन्ति

स्वर्गादयो वसतयः कथमत्र सन्ति ।

यद्येकरूपममलं परमार्थतत्त्वं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ २४ ॥

brahmadayah suraganah katham atra santi

svargadayo vasatayah katham atra santi ।

yad ekarupam amalam paramarthatattvam

jnanamritam samarasaṁ gaganopamo'ham ॥ 24 ॥

निर्नेति नेति विमलो हि कथं वदामि

निःशेषशेषविमलो हि कथं वदामि ।

निर्लिङ्गलिङ्गविमलो हि कथं वदामि

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ २५ ॥

nirneti neti vimalaḥ hi katham vadami

nihsheshashesha-vimalo hi katham vadami ।

nirlingalingavimalo hi katham vadami

jnanamritam samarasaṁ gaganopamo'ham ॥ 25 ॥

निष्कर्मकर्मपरमं सततं करोमि

निःसङ्गसङ्गरहितं परमं विनोदम् ।

निर्देहदेहरहितं सततं विनोदं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ २६ ॥

nishkarmakarmaparamam satatam karomi

nihsangasangarahitam paramam vinodam ।

nirdehadeharahitam satatam vinodam

jnanamritam samarasaṁ gaganopamo'ham ॥ 26 ॥

मायाप्रपञ्चरचना न च मे विकारः ।

कौटिल्यदम्भरचना न च मे विकारः ।

सत्यानृतेति रचना न च मे विकारो

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ २७ ॥

mayaprapancharachana na cha me vikarah ।

kautilyadambharachana na cha me vikarah ।

satyanriteti rachana na cha me vikaro

jnanamritam samarasaṁ gaganopamo'ham ॥ 27 ॥

सन्ध्यादिकालरहितं न च मे वियोगो-

ह्यन्तः प्रबोधरहितं बधिरो न मूकः ।

एवं विकल्परहितं न च भावशुद्धं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ २८ ॥

sandhyadikalarahitam na cha me viyogo

hy antah prabodharahitam badhiro na mukah ।

evam vikalparahitam na cha bhavashuddham

jnanamritam samarasaṁ gaganopamo'ham ॥ 28 ॥

निर्नाथनाथरहितं हि निराकुलं वै

निश्चित्तचित्तविगतं हि निराकुलं वै ।

संविद्धि सर्वविगतं हि निराकुलं वै

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ २९ ॥

nirnathanatharahitam hi nirakulam vai

nishchittachittavigatam hi nirakulam vai ।

samviddhi sarvavigatam hi nirakulam vai

jnanamritam samarasaṁ gaganopamo'ham ॥ 29 ॥

कान्तारमन्दिरमिदं हि कथं वदामि

संसिद्धसंशयमिदं हि कथं वदामि ।

एवं निरन्तरसमं हि निराकुलं वै

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३० ॥

kantar mandiram idam hi katham vadami

samsiddhasamshayam idam hi katham vadami ।

evam nirantarasamam hi nirakulam vai

jnanamritam samarasaṁ gaganopamo'ham ॥ 30 ॥

निर्जीवजीवरहितं सततं विभाति

निर्बीजबीजरहितं सततं विभाति ।

निर्वाणबन्धरहितं सततं विभाति

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३१ ॥

nirjivajivarahitam satatam vibhati

nirbijabijarahitam satatam vibhati ।

nirvanabandharahitam satatam vibhati

jnanamritam samarasaṁ gaganopamo'ham ॥ 31 ॥

सम्भूतिवर्जितमिदं सततं विभाति

संसारवर्जितमिदं सततं विभाति ।

संहारवर्जितमिदं सततं विभाति

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३२ ॥

sambhutivarjitam idam satatam vibhati

samsaravarjitam idam satatam vibhati ।

samharavarjitam idam satatam vibhati

jnanamritam samarasaṁ gaganopamo'ham ॥ 32 ॥

उल्लेखमात्रमपि ते न च नामरूपं

निर्भिन्नभिन्नमपि ते न हि वस्तु किञ्चित् ।

निर्लज्जमानस करोषि कथं विषादं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३३ ॥

ullekhamatram api te na cha namarupam

nirbhinnabhinnam api te na hi vastu kinchit ।

nirlajjamana sa karoshi katham vishadam

jnanamritam samarasaṁ gaganopamo'ham ॥ 33 ॥

किं नाम रोदिषि सखे न जरा न मृत्युः

किं नाम रोदिषि सखे न च जन्म दुःखम् ।

किं नाम रोदिषि सखे न च ते विकारो

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३४ ॥

kim nama rodishi sakhe na jara na mrityuh

kim nama rodishi sakhe na cha janma duhkham ।

kim nama rodishi sakhe na cha te vikaro

jnanamritam samarasaṁ gaganopamo'ham ॥ 34 ॥

किं नाम रोदिषि सखे न च ते स्वरूपं

किं नाम रोदिषि सखे न च ते विरूपम् ।

किं नाम रोदिषि सखे न च ते वयांसि

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३५ ॥

kim nama rodishi sakhe na cha te svarupam

kim nama rodishi sakhe na cha te virupam ।

kim nama rodishi sakhe na cha te vayamsi

jnanamritam samarasaṁ gaganopamo'ham ॥ 35 ॥

किं नाम रोदिषि सखे न च ते वयांसि

किं नाम रोदिषि सखे न च ते मनांसि ।

किं नाम रोदिषि सखे न तवेन्द्रियाणि

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३६ ॥

kim nama rodishi sakhe na cha te vayamsi

kim nama rodishi sakhe na cha te manamsi ।

kim nama rodishi sakhe na tavendriyani

jnanamritam samarasaṁ gaganopamo'ham ॥ 36 ॥

किं नाम रोदिषि सखे न च तेऽस्ति कामः

किं नाम रोदिषि सखे न च ते प्रलोभः ।

किं नाम रोदिषि सखे न च ते विमोहो

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३७ ॥

kim nama rodishi sakhe na cha te'sti kamah

kim nama rodishi sakhe na cha te pralobhah ।

kim nama rodishi sakhe na cha te vimohah

jnanamritam samarasaṁ gaganopamo'ham ॥ 37 ॥

ऐश्वर्यमिच्छसि कथं न च ते धनानि

ऐश्वर्यमिच्छसि कथं न च ते हि पत्नी ।

ऐश्वर्यमिच्छसि कथं न च ते ममेति

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३८ ॥

aishvaryam ichchhasi katham na cha te dhanani

aishvaryam ichchhasi katham na cha te hi patni ।

aishvaryam ichchhasi katham na cha te mameti

jnanamritam samarasaṁ gaganopamo'ham ॥ 38 ॥

लिङ्गप्रपञ्चजनुषी न च ते न मे च

निर्लज्जमानसमिदं च विभाति भिन्नम् ।

निर्भेदभेदरहितं न च ते न मे च

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ३९ ॥

lingaprapanchajanushi na cha te na me cha

nirlajjamanasam idam cha vibhati bhinnam ।

nirbhedabhedarahitam na cha te na me cha

jnanamritam samarasaṁ gaganopamo'ham ॥ 39 ॥

नो वाणुमात्रमपि ते हि विरागरूपं

नो वाणुमात्रमपि ते हि सरागरूपम् ।

नो वाणुमात्रमपि ते हि सकामरूपं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ४० ॥

no vanumatram api te hi viragarupam

no vanumatram api te hi saragarupam ।

no vanumatram api te hi sakamarupam

jnanamritam samarasaṁ gaganopamo'ham ॥ 40 ॥

ध्याता न ते हि हृदये न च ते समाधि-

र्ध्यानं न ते हि हृदये न बहिः प्रदेशः ।

ध्येयं न चेति हृदये न हि वस्तु कालो

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ४१ ॥

dhyata na te hi hridaye na cha te samadhi

dhyanam na te hi hridaye na bahih pradeshah ।

dhyeyam na cheti hridaye na hi vastu kalo

jnanamritam samarasaṁ gaganopamo'ham ॥ 41 ॥

यत्सारभूतमखिलं कथितं मया ते

न त्वं न मे न महतो न गुरुर्न न शिष्यः ।

स्वच्छन्दरूपसहजं परमार्थतत्त्वं

ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ ४२ ॥

yat sarabhutam akhilam kathitam maya te

na tvam na me na mahato na gurur na na shishyah ।

svachchhandarupasahajam paramarthatattvam

jnanamritam samarasaṁ gaganopamo'ham ॥ 42 ॥

कथमिह परमार्थं तत्त्वमानन्दरूपं कथमिह परमार्थं नैवमानन्दरूपम् ।

कथमिह परमार्थं ज्ञानविज्ञानरूपं यदि परमहमेकं वर्तते व्योमरूपम् ॥ ४३ ॥

katham iha paramartham tattvam anandarupam

katham iha paramartham naivam anandarupam ।

katham iha paramartham jnanavijnanarupam

yadi param aham ekam vartate vyomarupam ॥ 43 ॥

दहनपवनहीनं विद्धि विज्ञानमेक- मवनिजलविहीनं विद्धि विज्ञानरूपम् ।

समगमनविहीनं विद्धि विज्ञानमेकं गगनमिव विशालं विद्धि विज्ञानमेकम् ॥ ४४ ॥

dahanapavanahinam viddhi vijnanam ekam

avanijalavihinam viddhi vijnanarupam ।

samagamanavihinam viddhi vijnanam ekam

gaganam iva vishalam viddhi vijnanam ekam ॥ 44 ॥

न शून्यरूपं न विशून्यरूपं न शुद्धरूपं न विशुद्धरूपम् ।

रूपं विरूपं न भवामि किञ्चित् स्वरूपरूपं परमार्थतत्त्वम् ॥ ४५ ॥

na shunyarupam na vishunyarupam

na shuddharupam na vishuddharupam ।

rupam virupam na bhavami kinchit

svaruparupam paramarthatattvam ॥ 45 ॥

मुञ्च मुञ्च हि संसारं त्यागं मुञ्च हि सर्वथा ।

त्यागात्यागविषं शुद्धममृतं सहजं ध्रुवम् ॥ ४६ ॥

muncha muncha hi samsaram tyagam muncha hi sarvatha ।

tyagatyagavisham shuddham amritam sahajam dhruvam ॥ 46 ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

# Chapter 4: अथ चतुर्थोऽध्यायः

नावाहनं नैव विसर्जनं वा

पुष्पाणि पत्राणि कथं भवन्ति ।

ध्यानानि मन्त्राणि कथं भवन्ति

समासमं चैव शिवार्चनं च ॥ १ ॥

navahanam naiva visarjanam va

pushpani patrani katham bhavanti ।

dhyanani mantrani katham bhavanti

samasamam chaiva shivarchanam cha ॥ 1 ॥

न केवलं बन्धविबन्धमुक्तो

न केवलं शुद्धविशुद्धमुक्तः ।

न केवलं योगवियोगमुक्तः

स वै विमुक्तो गगनोपमोऽहम् ॥ २ ॥

na kevalam bandhavibandhamukto

na kevalam shuddhavishuddhamuktah ।

na kevalam yogaviyogamuktah

sa vai vimukto gaganopamo'ham ॥ 2 ॥

सञ्जायते सर्वमिदं हि तथ्यं

सञ्जायते सर्वमिदं वितथ्यम् ।

एवं विकल्पो मम नैव जातः

स्वरूपनिर्वाणमनामयोऽहम् ॥ ३ ॥

sanjayate sarvam idam hi tathyam

sanjayate sarvam idam vitathyam ।

evam vikalpo mama naiva jatah

svarupanirvanam anamayo'ham ॥ 3 ॥

न साञ्जनं चैव निरञ्जनं वा

न चान्तरं वापि निरन्तरं वा ।

अन्तर्विभन्नं न हि मे विभाति

स्वरूपनिर्वाणमनामयोऽहम् ॥ ४ ॥

na sanjanam chaiva niranjanam va

na cha antaram vapi nirantaram va ।

antarvibhannam na hi me vibhati

svarupanirvanam anamayo'ham ॥ 4 ॥

अबोधबोधो मम नैव जातो

बोधस्वरूपं मम नैव जातम् ।

निर्बोधबोधं च कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ ५ ॥

abodhabodho mama naiva jato

bodhasvarupam mama naiva jatam ।

nirbodhabodham cha katham vadami

svarupanirvanam anamayo'ham ॥ 5 ॥

न धर्मयुक्तो न च पापयुक्तो

न बन्धयुक्तो न च मोक्षयुक्तः ।

युक्तं त्वयुक्तं न च मे विभाति

स्वरूपनिर्वाणमनामयोऽहम् ॥ ६ ॥

na dharmayukto na cha papayukto

na bandhayukto na cha mokshayuktah ।

yuktam tv ayuktam na cha me vibhati

svarupanirvanam anamayo'ham ॥ 6 ॥

परापरं वा न च मे कदाचित्

मध्यस्थभावो हि न चारिमित्रम् ।

हिताहितं चापि कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ ७ ॥

paraparam va na cha me kadachit

madhyasthabhavo hi na charimitram ।

hitahitam chapi katham vadami

svarupanirvanam anamayo'ham ॥ 7 ॥

नोपासको नैवमुपास्यरूपं

न चोपदेशो न च मे क्रिया च ।

संवित्स्वरूपं च कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ ८ ॥

nopasako naivam upasyarupam

na chopadesho na cha me kriya cha ।

samvitsvarupam cha katham vadami

svarupanirvanam anamayo'ham ॥ 8 ॥

नो व्यापकं व्याप्यमिहास्ति किञ्चित्

न चालयं वापि निरालयं वा ।

अशून्यशून्यं च कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ ९ ॥

no vyapakam vyapyam ihasti kinchit

na chalayam vapi niralayam va ।

ashunyashunyam cha katham vadami

svarupanirvanam anamayo'ham ॥ 9 ॥

न ग्राहको ग्राह्यकमेव किञ्चित्

न कारणं वा मम नैव कार्यम् ।

अचिन्त्यचिन्त्यं च कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ १० ॥

na grahako grahyakam eva kinchit

na karanam va mama naiva karyam ।

achintyachintyam cha katham vadami

svarupanirvanam anamayo'ham ॥ 10 ॥

न भेदकं वापि न चैव भेद्यं

न वेदकं वा मम नैव वेद्यम् ।

गतागतं तात कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ ११ ॥

na bhedakam vapi na chaiva bhedyam

na vedakam va mama naiva vedyam ।

gatagatam tata katham vadami

svarupanirvanam anamayo'ham ॥ 11 ॥

न चास्ति देहो न च मे विदेहो

बुद्धिर्मनो मे न हि चेन्द्रियाणि ।

रागो विरागश्च कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ १२ ॥

na chasti deho na cha me videho

buddhir mano me na hi chendriyani ।

rago viragash cha katham vadami

svarupanirvanam anamayo'ham ॥ 12 ॥

उल्लेखमात्रं न हि भिन्नमुच्चै-

रुल्लेखमात्रं न तिरोहितं वै ।

समासमं मित्र कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ १३ ॥

ullekhamatram na hi bhinnam uchchair

ullekhamatram na tirohitam vai ।

samasamam mitra katham vadami

svarupanirvanam anamayo'ham ॥ 13 ॥

जितेन्द्रियोऽहं त्वजितेन्द्रियो वा

न संयमो मे नियमो न जातः ।

जयाजयौ मित्र कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ १४ ॥

jitendriyo'ham tv ajitendriyo va

na sanyamo me niyamo na jatah ।

jayajayau mitra katham vadami

svarupanirvanam anamayo'ham ॥ 14 ॥

अमूर्तमूर्तिर्न च मे कदाचि-

दाद्यन्तमध्यं न च मे कदाचित् ।

बलाबलं मित्र कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ १५ ॥

amurtamurtir na cha me kadachi

dadyantamadhyam na cha me kadachit ।

balabalam mitra katham vadami

svarupanirvanam anamayo'ham ॥ 15 ॥

मृतामृतं वापि विषाविषं च

सञ्जायते तात न मे कदाचित् ।

अशुद्धशुद्धं च कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ १६ ॥

mritamritam vapi vishavisham cha

sanjayate tata na me kadachit ।

ashuddhashuddham cha katham vadami

svarupanirvanam anamayo'ham ॥ 16 ॥

स्वप्नः प्रबोधो न च योगमुद्रा

नक्तं दिवा वापि न मे कदाचित् ।

अतुर्यतुर्यं च कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ १७ ॥

svapnah prabodho na cha yogamudra

naktam diva vapi na me kadachit ।

aturyaturyam cha katham vadami

svarupanirvanam anamayo'ham ॥ 17 ॥

संविद्धि मां सर्वविसर्वमुक्तं

माया विमाया न च मे कदाचित् ।

सन्ध्यादिकं कर्म कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ १८ ॥

samviddhi mam sarvavisarvamuktam

maya vimaya na cha me kadachit ।

sandhyadikam karma katham vadami

svarupanirvanam anamayo'ham ॥ 18 ॥

संविद्धि मां सर्वसमाधियुक्तं

संविद्धि मां लक्ष्यविलक्ष्यमुक्तम् ।

योगं वियोगं च कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ १९ ॥

samviddhi mam sarvasamadhiyuktam

samviddhi mam lakshyavilakshyamuktam ।

yogam viyogam cha katham vadami

svarupanirvanam anamayo'ham ॥ 19 ॥

मूर्खोऽपि नाहं न च पण्डितोऽहं

मौनं विमौनं न च मे कदाचित् ।

तर्कं वितर्कं च कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ २० ॥

murkho'pi naham na cha pandito'ham

maunam vimaunam na cha me kadachit ।

tarkam vitarkam cha katham vadami

svarupanirvanam anamayo'ham ॥ 20 ॥

पिता च माता च कुलं न जाति-

र्जन्मादि मृत्युर्न च मे कदाचित् ।

स्नेहं विमोहं च कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ २१ ॥

pita cha mata cha kulam na jati

janmadi mrityur na cha me kadachit ।

sneham vimoham cha katham vadami

svarupanirvanam anamayo'ham ॥ 21 ॥

अस्तं गतो नैव सदोदितोऽहं

तेजोवितेजो न च मे कदाचित् ।

सन्ध्यादिकं कर्म कथं वदामि

स्वरूपनिर्वाणमनामयोऽहम् ॥ २२ ॥

astam gato naiva sadodito'ham

tejovitejo na cha me kadachit ।

sandhyadikam karma katham vadami

svarupanirvanam anamayo'ham ॥ 22 ॥

असंशयं विद्धि निराकुलं मां

असंशयं विद्धि निरन्तरं माम् ।

असंशयं विद्धि निरञ्जनं मां

स्वरूपनिर्वाणमनामयोऽहम् ॥ २३ ॥

asamshayam viddhi nirakulam mam

asamshayam viddhi nirantaram mam ।

asamshayam viddhi niranjanam mam

svarupanirvanam anamayo'ham ॥ 23 ॥

ध्यानानि सर्वाणि परित्यजन्ति

शुभाशुभं कर्म परित्यजन्ति ।

त्यागामृतं तात पिबन्ति धीराः

स्वरूपनिर्वाणमनामयोऽहम् ॥ २४ ॥

dhyanani sarvani parityajanti

shubhashubham karma parityajanti ।

tyagamritam tata pibanti dhirah

svarupanirvanam anamayo'ham ॥ 24 ॥

विन्दति विन्दति न हि न हि यत्र

छन्दोलक्षणं न हि न हि तत्र ।

समरसमग्नो भावितपूतः

प्रलपति तत्त्वं परमवधूतः ॥ २५ ॥

vindati vindati na hi na hi yatra

chandolakshanam na hi na hi tatra ।

samarasamagno bhavitaputah

pralapati tattvam paramavadhutah ॥ 25 ॥

इति चतुर्थोऽध्यायः ॥ ४ ॥

# Chapter 5: अथ पञ्चमोऽध्यायः

ॐ इति गदितं गगनसमं तत्

न परापरसारविचार इति ।

अविलासविलासनिराकरणं

कथमक्षरबिन्दुसमुच्चरणम् ॥ १ ॥

om iti gaditam gaganasamam tat

na parapara-saravichara iti ।

avilasa-vilasa-nirakaranam

katham akshara-bindu-samuchcharanam ॥ 1 ॥

इति तत्त्वमसिप्रभृतिश्रुतिभिः

प्रतिपादितमात्मनि तत्त्वमसि ।

त्वमुपाधिविवर्जितसर्वसमं

किमु रोदिषि मानसि सर्वसमम् ॥ २ ॥

iti tattvam asi prabhriti shrutibhih

pratipaditam atmani tattvam asi ।

tvam upadhi-vivarjita-sarvasamam

kimu rodishi manasi sarvasamam ॥ 2 ॥

अध ऊर्ध्वविवर्जितसर्वसमं

बहिरन्तरवर्जितसर्वसमम् ।

यदि चैकविवर्जितसर्वसमं

किमु रोदिषि मानसि सर्वसमम् ॥ ३ ॥

adha urdhva-vivarjita-sarvasamam

bahir-antara-vivarjita-sarvasamam ।

yadi chaika-vivarjita-sarvasamam

kimu rodishi manasi sarvasamam ॥ 3 ॥

न हि कल्पितकल्पविचार इति

न हि कारणकार्यविचार इति ।

पदसन्धिविवर्जितसर्वसमं

किमु रोदिषि मानसि सर्वसमम् ॥ ४ ॥

na hi kalpita-kalpa-vichara iti

na hi karana-karya-vichara iti ।

pada-sandhi-vivarjita-sarvasamam

kimu rodishi manasi sarvasamam ॥ 4 ॥

न हि बोधविबोधसमाधिरिति

न हि देशविदेशसमाधिरिति ।

न हि कालविकालसमाधिरिति

किमु रोदिषि मानसि सर्वसमम् ॥ ५ ॥

na hi bodha-vibodha-samadhir iti

na hi desha-videsha-samadhir iti ।

na hi kala-vikala-samadhir iti

kimu rodishi manasi sarvasamam ॥ 5 ॥

न हि कुम्भनभो न हि कुम्भ इति

न हि जीववपुर्न हि जीव इति ।

न हि कारणकार्यविभाग इति

किमु रोदिषि मानसि सर्वसमम् ॥ ६ ॥

na hi kumbha-nabho na hi kumbha iti

na hi jiva-vapur na hi jiva iti ।

na hi karana-karya-vibhaga iti

kimu rodishi manasi sarvasamam ॥ 6 ॥

इह सर्वनिरन्तरमोक्षपदं

लघुदीर्घविचारविहीन इति ।

न हि वर्तुलकोणविभाग इति

किमु रोदिषि मानसि सर्वसमम् ॥ ७ ॥

iha sarva-nirantara-moksha-padam

laghu-dirgha-vichara-vihina iti ।

na hi vartula-kona-vibhaga iti

kimu rodishi manasi sarvasamam ॥ 7 ॥

इह शून्यविशून्यविहीन इति

इह शुद्धविशुद्धविहीन इति ।

इह सर्वविसर्वविहीन इति

किमु रोदिषि मानसि सर्वसमम् ॥ ८ ॥

iha shunya-vishunya-vihina iti

iha shuddha-vishuddha-vihina iti ।

iha sarva-visarva-vihina iti

kimu rodishi manasi sarvasamam ॥ 8 ॥

न हि भिन्नविभिन्नविचार इति

बहिरन्तरसन्धिविचार इति ।

अरिमित्रविवर्जितसर्वसमं

किमु रोदिषि मानसि सर्वसमम् ॥ ९ ॥

na hi bhinna-vibhinna-vichara iti

bahir-antara-sandhi-vichara iti ।

ari-mitra-vivarjita-sarvasamam

kimu rodishi manasi sarvasamam ॥ 9 ॥

न हि शिष्यविशिष्यस्वरूप इति

न चराचरभेदविचार इति ।

इह सर्वनिरन्तरमोक्षपदं

किमु रोदिषि मानसि सर्वसमम् ॥ १० ॥

na hi shishya-vishishya-svarupa iti

na charachara-bheda-vichara iti ।

iha sarva-nirantara-moksha-padam

kimu rodishi manasi sarvasamam ॥ 10 ॥

ननु रूपविरूपविहीन इति

ननु भिन्नविभिन्नविहीन इति ।

ननु सर्गविसर्गविहीन इति

किमु रोदिषि मानसि सर्वसमम् ॥ ११ ॥

nanu rupa-virupa-vihina iti

nanu bhinna-vibhinna-vihina iti ।

nanu sarga-visarga-vihina iti

kimu rodishi manasi sarvasamam ॥ 11 ॥

न गुणागुणपाशनिबन्ध इति

मृतजीवनकर्म करोमि कथम् ।

इति शुद्धनिरञ्जनसर्वसमं

किमु रोदिषि मानसि सर्वसमम् ॥ १२ ॥

na gunaguna-pasha-nibandha iti

mrita-jivana-karma karomi katham ।

iti shuddha-niranjana-sarvasamam

kimu rodishi manasi sarvasamam ॥ 12 ॥

इह भावविभावविहीन इति

इह कामविकामविहीन इति ।

इह बोधतमं खलु मोक्षसमं

किमु रोदिषि मानसि सर्वसमम् ॥ १३ ॥

iha bhava-vibhava-vihina iti

iha kama-vikama-vihina iti ।

iha bodha-tamam khalu moksha-samam

kimu rodishi manasi sarvasamam ॥ 13 ॥

इह तत्त्वनिरन्तरतत्त्वमिति

न हि सन्धिविसन्धिविहीन इति ।

यदि सर्वविवर्जितसर्वसमं

किमु रोदिषि मानसि सर्वसमम् ॥ १४ ॥

iha tattva-nirantara-tattvam iti

na hi sandhi-visandhi-vihina iti ।

yadi sarva-vivarjita-sarvasamam

kimu rodishi manasi sarvasamam ॥ 14 ॥

अनिकेतकुटी परिवारसमं

इह सङ्गविसङ्गविहीनपरम् ।

इह बोधविबोधविहीनपरं

किमु रोदिषि मानसि सर्वसमम् ॥ १५ ॥

aniketa-kuti parivara-samam

iha sanga-visanga-vihina-param ।

iha bodha-vibodha-vihina-param

kimu rodishi manasi sarvasamam ॥ 15 ॥

अविकारविकारमसत्यमिति

अविलक्षविलक्षमसत्यमिति ।

यदि केवलमात्मनि सत्यमिति

किमु रोदिषि मानसि सर्वसमम् ॥ १६ ॥

avikara-vikaram asatyam iti

avilaksha-vilaksham asatyam iti ।

yadi kevalam atmani satyam iti

kimu rodishi manasi sarvasamam ॥ 16 ॥

इह सर्वसमं खलु जीव इति

इह सर्वनिरन्तरजीव इति ।

इह केवलनिश्चलजीव इति

किमु रोदिषि मानसि सर्वसमम् ॥ १७ ॥

iha sarva-samam khalu jiva iti

iha sarva-nirantara-jiva iti ।

iha kevala-nishchala-jiva iti

kimu rodishi manasi sarvasamam ॥ 17 ॥

अविवेकविवेकमबोध इति

अविकल्पविकल्पमबोध इति ।

यदि चैकनिरन्तरबोध इति

किमु रोदिषि मानसि सर्वसमम् ॥ १८ ॥

aviveka-vivekam abodha iti

avikalpa-vikalpam abodha iti ।

yadi chaika-nirantara-bodha iti
kimu rodishi manasi sarvasamam ॥ 18 ॥

न हि मोक्षपदं न हि बन्धपदं
न हि पुण्यपदं न हि पापपदम् ।
न हि पूर्णपदं न हि रिक्तपदं
किमु रोदिषि मानसि सर्वसमम् ॥ १९ ॥

na hi moksha-padam na hi bandha-padam
na hi punya-padam na hi papa-padam ।
na hi purna-padam na hi rikta-padam
kimu rodishi manasi sarvasamam ॥ 19 ॥

यदि वर्णविवर्णविहीनसमं
यदि कारणकार्यविहीनसमम् ।
यदि भेदविभेदविहीनसमं
किमु रोदिषि मानसि सर्वसमम् ॥ २० ॥

yadi varna-vivarna-vihina-samam
yadi karana-karya-vihina-samam ।

yadi bheda-vibheda-vihina-samam

kimu rodishi manasi sarvasamam ॥ 20 ॥

इह सर्वनिरन्तरसर्वचिते

इह केवलनिश्चलसर्वचिते ।

द्विपदादिविवर्जितसर्वचिते

किमु रोदिषि मानसि सर्वसमम् ॥ २१ ॥

iha sarva-nirantara-sarva-chite

iha kevala-nishchala-sarva-chite ।

dvipadadi-vivarjita-sarva-chite

kimu rodishi manasi sarvasamam ॥ 21 ॥

अतिसर्वनिरन्तरसर्वगतं

अतिनिर्मलनिश्चलसर्वगतम् ।

दिनरात्रिविवर्जितसर्वगतं

किमु रोदिषि मानसि सर्वसमम् ॥ २२ ॥

ati-sarva-nirantara-sarvagatam

ati-nirmala-nishchala-sarvagatam ।

dina-ratri-vivarjita-sarvagatam

kimu rodishi manasi sarvasamam ॥ 22 ॥

न हि बन्धविबन्धसमागमनं

न हि योगवियोगसमागमनम् ।

न हि तर्कवितर्कसमागमनं

किमु रोदिषि मानसि सर्वसमम् ॥ २३ ॥

na hi bandha-vibandha-samagamanam

na hi yoga-viyoga-samagamanam ।

na hi tarka-vitarka-samagamanam

kimu rodishi manasi sarvasamam ॥ 23 ॥

इह कालविकालनिराकरणं

अणुमात्रकृशानुनिराकरणम् ।

न हि केवलसत्यनिराकरणं

किमु रोदिषि मानसि सर्वसमम् ॥ २४ ॥

iha kala-vikala-nirakaranam

anumatra-krishanu-nirakaranam ।

na hi kevala-satya-nirakaranam

kimu rodishi manasi sarvasamam ॥ 24 ॥

इह देहविदेहविहीन इति

ननु स्वप्नसुषुप्तिविहीनपरम् ।

अभिधानविधानविहीनपरं

किमु रोदिषि मानसि सर्वसमम् ॥ २५ ॥

iha deha-videha-vihina iti

nanu svapna-sushupti-vihina-param ।

abhidhana-vidhana-vihina-param

kimu rodishi manasi sarvasamam ॥ 25 ॥

गगनोपमशुद्धविशालसमं

अतिसर्वविवर्जितसर्वसमम् ।

गतसारविसारविकारसमं

किमु रोदिषि मानसि सर्वसमम् ॥ २६ ॥

gaganopama-shuddha-vishala-samam

ati-sarva-vivarjita-sarvasamam ।

gata-sara-visara-vikara-samam

kimu rodishi manasi sarvasamam ॥ 26 ॥

इह धर्मविधर्मविरागतर- मिह वस्तुविवस्तुविरागतरम् ।

इह कामविकामविरागतरं किमु रोदिषि मानसि सर्वसमम् ॥ २७ ॥

iha dharma-vidharma-viragataram

iha vastu-vivastu-viragataram ।

iha kama-vikama-viragataram

kimu rodishi manasi sarvasamam ॥ 27 ॥

सुखदुःखविवर्जितसर्वसम-

मिह शोकविशोकविहीनपरम् ।

गुरुशिष्यविवर्जिततत्त्वपरं

किमु रोदिषि मानसि सर्वसमम् ॥ २८ ॥

sukha-duhkha-vivarjita-sarvasamam

iha shoka-vishoka-vihinaparam ।

guru-shishya-vivarjita-tattvaparam

kimu rodishi manasi sarvasamam ॥ 28 ॥

न किलाङ्कुरसारविसार इति

न चलाचलसाम्यविसाम्यमिति ।

अविचारविचारविहीनमिति

किमु रोदिषि मानसि सर्वसमम् ॥ २९ ॥

na kilankura-sara-visara iti

na chalachala-samya-visamyam iti ।

avichara-vichara-vihinam iti

kimu rodishi manasi sarvasamam ॥ 29 ॥

इह सारसमुच्चयसारमिति ।

कथितं निजभावविभेद इति ।

विषये करणत्वमसत्यमिति

किमु रोदिषि मानसि सर्वसमम् ॥ ३० ॥

iha sara-samuchchaya-saram iti ।

kathitam nija-bhava-vibheda iti ।

vishaye karanatvam asatyam iti

kimu rodishi manasi sarvasamam ॥ 30 ॥

बहुधा श्रुतयः प्रवदन्ति यतो वियदादिरिदं मृगतोयसमा ।
यदि चैकनिरन्तरसर्वसमं किमु रोदिषि मानसि सर्वसमम् ॥ ३१ ॥

bahudha shrutayah pravadanti yato
viyadadir idam mrigatoyasamam ।
yadi chaika-nirantara-sarvasamam
kimu rodishi manasi sarvasamam ॥ 31 ॥

विन्दति विन्दति न हि न हि यत्र छन्दोलक्षणं न हि न हि तत्र ।
समरसमग्नो भावितपूतः प्रलपति तत्त्वं परं अवधूतः ॥ ३२ ॥

vindati vindati na hi na hi yatra
chhando-lakshanam na hi na hi tatra ।
samarasam agno bhavitaputah
pralapati tattvam param avadhutah ॥ 32 ॥

इति पञ्चमोऽध्यायः ॥ ५॥

## Chapter 6: अथ षष्ठमोऽध्यायः

बहुधा श्रुतयः प्रवदन्ति वयं

वियदादिरिदं मृगतोयसमम् ।

यदि चैकनिरन्तरसर्वशिव-

मुपमेयमथोह्युपमा च कथम् ॥ १ ॥

bahudha shrutayah pravadanti vayam

viyadadir idam mrigatoyasamam ।

yadi chaikanirantarasarvashivam

upameyam athohy upama cha katham ॥ 1 ॥

अविभक्तिविभक्तिविहीनपरं

ननु कार्यविकार्यविहीनपरम् ।

यदि चैकनिरन्तरसर्वशिवं

यजनं च कथं तपनं च कथम् ॥ २ ॥

avibhaktivibhaktivihinaparam

nanu karyavikaryavihinaparam ।

yadi chaikanirantarasarvashivam

yajanam cha katham tapanam cha katham ॥ 2 ॥

मन एव निरन्तरसर्वगतं

ह्यविशालविशालविहीनपरम् ।

मन एव निरन्तरसर्वशिवं

मनसापि कथं वचसा च कथम् ॥ ३ ॥

mana eva nirantarasarvagatam

hy avishalavishalavihinaparam ।

mana eva nirantarasarvashivam

manasapi katham vachasa cha katham ॥ 3 ॥

दिनरात्रिविभेदनिराकरण-

मुदितानुदितस्य निराकरणम् ।

यदि चैकनिरन्तरसर्वशिवं

रविचन्द्रमसौ ज्वलनश्च कथम् ॥ ४ ॥

dinaratrivibhedanirakaranam

uditanuditasya nirakaranam ।

yadi chaikanirantarasarvashivam

ravichandramasau jvalanash cha katham ॥ 4 ॥

गतकामविकामविभेद इति

गतचेष्टविचेष्टविभेद इति ।

यदि चैकनिरन्तरसर्वशिवं

बहिरन्तरभिन्नमतिश्च कथम् ॥ ५ ॥

gatakamavikamavibheda iti

gataceshtavicheshtavibheda iti ।

yadi chaikanirantarasarvashivam

bahirantarabhinnamatish cha katham ॥ 5 ॥

यदि सारविसारविहीन इति

यदि शून्यविशून्यविहीन इति ।

यदि चैकनिरन्तरसर्वशिवं

प्रथमं च कथं चरमं च कथम् ॥ ६ ॥

yadi saravisaravihina iti

yadi shunyavishunyavihina iti ।

yadi chaikanirantarasarvashivam

prathamam cha katham charamam cha katham ॥ 6 ॥

यदिभेदविभेदनिराकरणं

यदि वेदकवेद्यनिराकरणम् ।

यदि चैकनिरन्तरसर्वशिवं

तृतीयं च कथं तुरीयं च कथम् ॥ ७ ॥

yadibhedavibhedanirakaranam

yadi vedakavedyanirakaranam ।

yadi chaikanirantarasarvashivam

tritiyam cha katham turiyam cha katham ॥ 7 ॥

गदिताविदितं न हि सत्यमिति

विदिताविदितं न हि सत्यमिति ।

यदि चैकनिरन्तरसर्वशिवं

विषयेन्द्रियबुद्धिमनांसि कथम् ॥ ८ ॥

gaditaviditam na hi satyam iti

viditaviditam na hi satyam iti ।

yadi chaikanirantarasarvashivam

vishayendriyabuddhimanamsi katham ॥ 8 ॥

गगनं पवनो न हि सत्यमिति

धरणी दहनो न हि सत्यमिति ।

यदि चैकनिरन्तरसर्वशिवं

जलदश्च कथं सलिलं च कथम् ॥ ९ ॥

gaganam pavano na hi satyam iti

dharani dahano na hi satyam iti ।

yadi chaikanirantarasarvashivam

jaladash cha katham salilam cha katham ॥ 9 ॥

यदि कल्पितलोकनिराकरणं

यदि कल्पितदेवनिराकरणम् ।

यदि चैकनिरन्तरसर्वशिवं

गुणदोषविचारमतिश्च कथम् ॥ १० ॥

yadi kalpitalokanirakaranam

yadi kalpitadevanirakaranam ।

yadi chaikanirantarasarvashivam

gunadoshavicharamatish cha katham ॥ 10 ॥

मरणामरणं हि निराकरणं

करणाकरणं हि निराकरणम् ।

यदि चैकनिरन्तरसर्वशिवं

गमनागमनं हि कथं वदति ॥ ११ ॥

maranamarana hi nirakaranam

karanakaranam hi nirakaranam ।

yadi chaikanirantarasarvashivam

gamanagamanam hi katham vadati ॥ 11 ॥

प्रकृतिः पुरुषो न हि भेद इति

न हि कारणकार्यविभेद इति ।

यदि चैकनिरन्तरसर्वशिवं

पुरुषापुरुषं च कथं वदति ॥ १२ ॥

prakritih purusho na hi bheda iti

na hi karanakaryavibheda iti ।

yadi chaikanirantarasarvashivam

purushapurusham cha katham vadati ॥ 12 ॥

तृतीयं न हि दुःखसमागमनं

न गुणाद्द्वितीयस्य समागमनम् ।

यदि चैकनिरन्तरसर्वशिवं

स्थविरश्च युवा च शिशुश्च कथम् ॥ १३ ॥

tritiyam na hi duhkhasamagamanam

na gunad dvitiyasya samagamanam ।

yadi chaikanirantarasarvashivam

sthavirash cha yuva cha shishush cha katham ॥ 13 ॥

ननु आश्रमवर्णविहीनपरं

ननु कारणकर्तृविहीनपरम् ।

यदि चैकनिरन्तरसर्वशिव-

मविनष्टविनष्टमतिश्च कथम् ॥ १४ ॥

nanu ashramavarnavihinaparam

nanu karanakarturavihinaparam ।

yadi chaikanirantarasarvashivam

avinashitavinashitamatish cha katham ॥ 14 ॥

ग्रसिताग्रसितं च वितथ्यमिति

जनिताजनितं च वितथ्यमिति ।

यदि चैकनिरन्तरसर्वशिव-

मविनाशि विनाशि कथं हि भवेत् ॥ १५ ॥

grasitagrasitam cha vitathyam iti

janitajanitam cha vitathyam iti ।

yadi chaikanirantarasarvashivam

avinashi vinashi katham hi bhavet ॥ 15 ॥

पुरुषापुरुषस्य विनष्टमिति

वनितावनितस्य विनष्टमिति ।

यदि चैकनिरन्तरसर्वशिव-

मविनोदविनोदमतिश्च कथम् ॥ १६ ॥

purushapurushasya vinashtam iti

vanitavanitasya vinashtam iti ।

yadi chaikanirantarasarvashivam
avinodavinodamatish cha katham ॥ 16 ॥

यदि मोहविषादविहीनपरो
यदि संशयशोकविहीनपरः ।
यदि चैकनिरन्तरसर्वशिव-
महमत्र ममेति कथं च पुनः ॥ १७ ॥

yadi mohavishadavihinaparo
yadi samshayashokavihinaparah ।
yadi chaikanirantarasarvashivam
aham atra mameti katham cha punah ॥ 17 ॥

ननु धर्मविधर्मविनाश इति
ननु बन्धविबन्धविनाश इति ।
यदि चैकनिरन्तरसर्वशिवं-
मिहदुःखविदुःखमतिश्च कथम् ॥ १८ ॥

nanu dharmavidharmavinasha iti
nanu bandhavibandhavinasha iti ।

yadi chaikanirantarasarvashivam

iha duhkha viduhkhamatish cha katham ॥ 18 ॥

न हि याज्ञिकयज्ञविभाग इति

न हुताशनवस्तुविभाग इति ।

यदि चैकनिरन्तरसर्वशिवं

वद कर्मफलानि भवन्ति कथम् ॥ १९ ॥

na hi yajnikayajnavibhaga iti

na hutashanavastuvibhaga iti ।

yadi chaikanirantarasarvashivam

vada karmaphalani bhavanti katham ॥ 19 ॥

ननु शोकविशोकविमुक्त इति

ननु दर्पविदर्पविमुक्त इति ।

यदि चैकनिरन्तरसर्वशिवं

ननु रागविरागमतिश्च कथम् ॥ २० ॥

nanu shokavishokavimukta iti

nanu darpavidarpavimukta iti ।

yadi chaikanirantarasarvashivam

nanu ragaviragamatish cha katham ॥ 20 ॥

न हि मोहविमोहविकार इति

न हि लोभविलोभविकार इति ।

यदि चैकनिरन्तरसर्वशिवं

ह्यविवेकविवेकमतिश्च कथम् ॥ २१ ॥

na hi mohavimohavikara iti

na hi lobhavilobhavikara iti ।

yadi chaikanirantarasarvashivam

hy avivekavivekamatish cha katham ॥ 21 ॥

त्वमहं न हि हन्त कदाचिदपि

कुलजातिविचारमसत्यमिति ।

अहमेव शिवः परमार्थ इति

अभिवादनमत्र करोमि कथम् ॥ २२ ॥

tvam aham na hi hanta kadachid api

kulajativicharam asatyam iti ।

aham eva shivah paramartha iti

abhivadanam atra karomi katham ॥ 22 ॥

गुरुशिष्यविचारविशीर्ण इति

उपदेशविचारविशीर्ण इति ।

अहमेव शिवः परमार्थ इति

अभिवादनमत्र करोमि कथम् ॥ २३ ॥

gurushishyavicharavishirna iti

upadeshavicharavishirna iti ।

aham eva shivah paramartha iti

abhivadanam atra karomi katham ॥ 23 ॥

न हि कल्पितदेहविभाग इति

न हि कल्पितलोकविभाग इति ।

अहमेव शिवः परमार्थ इति

अभिवादनमत्र करोमि कथम् ॥ २४ ॥

na hi kalpitadehavibhaga iti

na hi kalpitalokavibhaga iti ।

aham eva shivah paramartha iti
abhivadanam atra karomi katham ॥ 24 ॥

सरजो विरजो न कदाचिदपि
ननु निर्मलनिश्चलशुद्ध इति ।
अहमेव शिवः परमार्थ इति
अभिवादनमत्र करोमि कथम् ॥ २५ ॥

sarajo virajo na kadachid api
nanu nirmalanishchalashuddha iti ।
aham eva shivah paramartha iti
abhivadanam atra karomi katham ॥ 25 ॥

न हि देहविदेहविकल्प इति
अनृतं चरितं न हि सत्यमिति ।
अहमेव शिवः परमार्थ इति
अभिवादनमत्र करोमि कथम् ॥ २६ ॥

na hi dehavidehavikalpa iti
anritam charitam na hi satyam iti ।

aham eva shivah paramartha iti

abhivadanam atra karomi katham ॥ 26 ॥

विन्दति विन्दति न हि न हि यत्र

छन्दोलक्षणं न हि न हि तत्र ।

समरसमग्नो भावितपूतः

प्रलपति तत्त्वं परमवधूतः ॥ २७ ॥

vindati vindati na hi na hi yatra

chandolaksanam na hi na hi tatra ।

samarasam agno bhavitaputah

pralapati tattvam paramavadhutah ॥ 27 ॥

इति षष्ठमोऽध्यायः ॥ ६ ॥

## Chapter 7: अथ सप्तमोऽध्यायः

रथ्याकर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः ।

शून्यागारे तिष्ठति नग्नो शुद्धनिरञ्जनसमरसमग्नः ॥ १ ॥

rathyakarpata virachita kanthah

punyapunyavivarjitapanthah ।

shunyagare tishthati nagno

shuddhaniranjanasamarasamag nah ॥ 1 ॥

लक्ष्यालक्ष्यविवर्जितलक्ष्यो

युक्तायुक्तविवर्जितदक्षः ।

केवलतत्त्वनिरञ्जनपूतो

वादविवादः कथमवधूतः ॥ २ ॥

lakshyalakshyavivarjitalakshyo

yuktayuktavivarjitadakshah ।

kevalatattvaniranjanaputo

vadavivadah katham avadhutah ॥ 2 ॥

आशापाशविबन्धनमुक्ताः

शौचाचारविवर्जितयुक्ताः ।

एवं सर्वविवर्जितशान्ता-

स्तत्त्वं शुद्धनिरञ्जनवन्तः ॥ ३ ॥

ashapashavibandhanamuktah

shauchacharavivarjitayuktah ।

evam sarvavivarjitashanta-

stattvam shuddhaniranjanavantah ॥ 3 ॥

कथमिह देहविदेहविचारः

कथमिह रागविरागविचारः ।

निर्मलनिश्चलगगनाकारं

स्वयमिह तत्त्वं सहजाकारम् ॥ ४ ॥

katham iha dehavidehavicharah

katham iha ragaviragavicharah ।

nirmalanishchala gaganakaram

svayam iha tattvam sahaj akaram ॥ 4 ॥

कथमिह तत्त्वं विन्दति यत्र

रूपमरूपं कथमिह तत्र ।

गगनाकारः परमो यत्र

विषयीकरणं कथमिह तत्र ॥ ५॥

katham iha tattvam vindati yatra

rupam arupam katham iha tatra ।

gaganakarah paramo yatra

vishayikaranam katham iha tatra ॥ 5॥

गगनाकारनिरन्तरहंस-

स्तत्त्वविशुद्धनिरञ्जनहंसः ।

एवं कथमिह भिन्नविभिन्नं

बन्धविबन्धविकारविभिन्नम् ॥ ६॥

gaganakaranirantarahamsa-

tattvavishuddhaniranjanahamsah ।

evam katham iha bhinnavibhinnam

bandhavibandhavikaravibhinnam ॥ 6॥

केवलतत्त्वनिरन्तरसर्वं योगवियोगौ कथमिह गर्वम् ।
एवं परमनिरन्तरसर्व- मेवं कथमिह सारविसारम् ॥ ७ ॥

kevalatattvanirantarasarvam
yogaviyogau katham iha garvam ।
evam paramanirantarasarvam
evam katham iha saravisaram ॥ 7 ॥

केवलतत्त्वनिरञ्जनसर्वं गगनाकारनिरन्तरशुद्धम् ।
एवं कथमिह सङ्गविसङ्गं सत्यं कथमिह रङ्गविरङ्गम् ॥ ८ ॥

kevalatattvaniranjanasarvam
gaganakaranirantarashuddham ।
evam katham iha sangavisangam
satyam katham iha rangavirangam ॥ 8 ॥

योगवियोगै रहितो योगी
भोगविभोगै रहितो भोगी ।
एवं चरति हि मन्दं मन्दं

मनसा कल्पितसहजानन्दम् ॥ ९॥

yogaviyogai rahito yogi

bhogavibhogai rahito bhogi ।

evam charati hi mandam mandam

manasa kalpitasahajanandam ॥ 9 ॥

बोधविबोधैः सततं युक्तो

द्वैताद्वैतैः कथमिह मुक्तः ।

सहजो विरजः कथमिह योगी

शुद्धनिरञ्जनसमरसभोगी ॥ १० ॥

bodhavibodhaih satatam yukto

dvaitadvaitaih katham iha muktah ।

sahajo virajah katham iha yogi

shuddhaniranjanasamarasabhogi ॥ 10 ॥

भग्नाभग्नविवर्जितभग्नो

लग्नालग्नविवर्जितलग्नः ।

एवं कथमिह सारविसारः

समरसतत्त्वं गगनाकारः ॥ ११ ॥

bhagnabhagnavivarjitabhagno

lagnalagnavivarjitalagnah ।

evam katham iha saravisarah

samarasatattvam gaganakarah ॥ 11 ॥

सततं सर्वविवर्जितयुक्तः

सर्वं तत्त्वविवर्जितमुक्तः ।

एवं कथमिह जीवितमरणं

ध्यानाध्यानैः कथमिह करणम् ॥ १२ ॥

satatam sarvavivarjitayuktah

sarvam tattvavivarjitamuktah ।

evam katham iha jivitamaranam

dhyanadhyanaih katham iha karanam ॥ 12 ॥

इन्द्रजालमिदं सर्वं यथा मरुमरीचिका ।

अखण्डितमनाकारो वर्तते केवलः शिवः ॥ १३ ॥

indrajalam idam sarvam yatha marumarichika ।
akhanditamanakaro vartate kevalah shivah ॥ 13 ॥

धर्मादौ मोक्षपर्यन्तं निरीहाः सर्वथा वयम् ।
कथं रागविरागैश्च कल्पयन्ति विपश्चितः ॥ १४ ॥

dharmadau mokshaparyantam nirihah sarvatha vayam ।
katham ragaviragaish cha kalpayanti vipashchitah ॥ 14 ॥

विन्दति विन्दति न हि न हि यत्र छन्दोलक्षणं न हि न हि तत्र ।
समरसमग्नो भावितपूतः प्रलपति तत्त्वं परमवधूतः ॥ १५ ॥

vindati vindati na hi na hi yatra
chandolaksanam na hi na hi tatra ।
samarasam agno bhavitaputah
pralapati tattvam paramavadhutah ॥ 15 ॥

इति सप्तमोऽध्यायः ॥ ७ ॥

# Chapter 8: अथ अष्टमोऽध्यायः

त्वद्यात्रया व्यापकता हता ते
ध्यानेन चेतःपरता हता ते ।
स्तुत्या मया वाक्परता हता ते
क्षमस्व नित्यं त्रिविधापराधान् ॥ १ ॥

tvad yatraya vyapakata hata te
dhyanena chetah parata hata te ।
stutya maya vakparata hata te
kshamasva nityam trividha aparadhan ॥

कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः ।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः ॥ २ ॥

kamair ahatadhir danto mriduh shuchir akinchanah ।
aniho mitabhuk shantah sthiro machchharano munih ॥

अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः ।

अमानी मानदः कल्पो मैत्रः कारुणिकः कविः ॥ ३ ॥

apramatto gabhiratma dhritiman jitashadgunah ।

amani manadah kalpo maitrah karunikah kavih ॥

कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम् ।

सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः ॥ ४ ॥

kripalur akritadrohas titikshuh sarvadehinam ।

satyasaro anavadyatma samah sarvopak arakah ॥

अवधूतलक्षणं वर्णैर्ज्ञातव्यं भगवत्तमैः ।

वेदवर्णार्थतत्त्वज्ञैर्वेदवेदान्तवादिभिः ॥ ५ ॥

avadhutalakshanam varnair jnatavyam bhagavatt amaih ।

vedavarnarthatattvajnair vedavedantavadibhih ॥

आशापाशविनिर्मुक्त आदिमध्यान्तनिर्मलः ।

आनन्दे वर्तते नित्यमकारं तस्य लक्षणम् ॥ ६ ॥

ashapashavinirmukta adimadhyantanirmalah ।
anande vartate nityam akaram tasya lakshanam ॥

वासना वर्जिता येन वक्तव्यं च निरामयम् ।
वर्तमानेषु वर्तेत वकारं तस्य लक्षणम् ॥ ७ ॥

vasana varjita yena vaktavyam cha niramayam ।
vartamaneshu varteta vakaram tasya lakshanam ॥

धूलिधूसरगात्राणि धूतचित्तो निरामयः ।
धारणाध्याननिर्मुक्तो धूकारस्तस्य लक्षणम् ॥ ८ ॥

dhulidhusara gatrani dhutachitto niramayah ।
dharanadhyananirmukto dhukaras tasya lakshanam ॥

तत्त्वचिन्ता धृता येन चिन्ताचेष्टाविवर्जितः ।
तमोऽहंकारनिर्मुक्तस्तकारस्तस्य लक्षणम् ॥ ९ ॥

tattvachinta dhrita yena chintacheshtavivarjitah ।
tamo ahankaranirmuktas takaras tasya lakshanam ॥

दत्तात्रेयावधूतेन निर्मितानन्दरूपिणा ।

ये पठन्ति च श्रृण्वन्ति तेषां नैव पुनर्भवः ॥ १० ॥

dattatreyavadhutena nirmitanandarupina ।

ye pathanti cha shrunvanti tesham naiva punarbhavah ॥

इति अष्टमोऽध्यायः ॥ ८ ॥

***

ॐ तत् सत्

श्रीमदवधूतगीता समाप्तम्

May the timeless wisdom of the Avadhuta Gita inspire self-knowledge, freedom, inner peace, and spiritual realization.

This edition is shared freely for the benefit of all.

Everyone is welcome to read, copy, share, print, translate, adapt, and distribute this edition freely.

लोकाः समस्ताः सुखिनो भवन्तु।

*May all beings everywhere*
*be happy and free.*

---

Kedi Ganapati
MKG Digital University of Sanatan Dharma
First Digital Edition, 2026